
5 990010 900662

A DESCRIPTIVE CATALOGUE

OF THE

SANSKRIT MANUSCRIPTS

IN THE

GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS

BY

MAHĀMAHŌPĀDHYĀYA VIDYĀVĀCASPATI

S. KUPPUSWAMI SASTRI, M.A., I.E.S. (*Retired*)

CURATOR, GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, AND PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE, MADRAS (*Retired*)

AND

VIDYĀSĀGARA VIDYĀVĀCASPATI

P. P. SUBRAHMANYA SASTRI, B.A. (Hons.) (Oxon.), M.A.,

CURATOR, GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, AND PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE MADRAS.

(*Prepared under the orders of the Government of Madras*)

D. No. 15693 to D. No. 16200

Volume XXVIII—Supplemental

MADRAS

PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS

1939

TABLE OF TRANSLITERATION.

—	Consonants.	Semi-vowels, sibilants and aspirate.	Vowels.	Diphthongs.
Gutturals	k, kh, g, gh, ṅ	h, ḥ ...	a, ā ...	ē, ai
Palatals	c, ch, j, jh, ñ ..	y, ś ...	i, ī ...	
Linguals	ṭ, ṭh, ḍ, ḍh, ṇ	r, ...	ṛ, ṛī ...	
Dentals	t, th, d, dh, n ...	l, s ...	ḷ, ḷī ...	
Labials	p, ph, b, bh, m.	v ...	u, ū ...	ō, au

schools of thought, viz., *Vedāntic* and *Mīmāṁsaic.* For this purpose he cites passages from Śabara, Kumārila, Śrī Śaṅkara and Sureśvara. In order to emphasize this view, he comes forward to declare that the aphorism "चोदनालक्षणोऽर्थो धर्मः" is common to both the parts of *Mīmāṁsā*, viz., *Karman* and *Brahman* (Vide—"चोदना लक्षणोऽर्थो धर्म इति निमित्तनैमित्तिकप्रतिज्ञा कृता । निमित्तं प्रमाणम् । नैमित्तिकं प्रमेयम् । तच्चैतद्रूपं (सूत्रं) धर्मब्रह्मणोः प्रमेयभूतयो-श्चोदनासमन्वययोश्च प्रमाणभूतयोः शास्त्रविषययोः साधारणम् ।") The author clearly expresses this idea in the last stanza (Vide—

"श्रीदेवेश्वरपादपङ्कजरजसा सद्यः पवित्रीकृतः
सर्वज्ञात्ममहामुनिः प्रकरणं चक्रे त्रि(द्वि)काण्डीगतम् ।")

As regards the date of the author, the late T. A. Gopīnātha Rao wrote an article in the Travancore Archaeological Series, wherein he placed our author in the 10th century A.D., since the author refers to King Manukulāditya (10th century) as his patron in his *Saṁkṣepaśārīraka.* This refutes the notion that Sarvajñātman was a pupil of Sureśvara. The following passage found at the end of the work strengthens the above conclusion (Vide—

"श्रीश्रेष्ठानन्दपादशिष्याः श्रीदेवानन्दपादाः । श्रीदेवानन्दपादशिष्याः श्रीदेवेश्वरपादाः । श्रीदेवेश्वरपादशिष्याः श्रीसर्वज्ञात्मपादाः तदीया कृतिः प्रमाणलक्षणं समाप्तम् ।")

Sarvajñātman herein mentions Sureśvara by name (Vide "सुरेश्वरस्य वार्तिकं गमकमाहुः ।" page 39 of the manuscript). This shows that the interpretation of the term "Deveśvara" to mean Sureśvara, made by some commentaries and a few scholars, on the ground that the name of the preceptor should not be referred to as such by a pupil, does not appear to be wholly sound. An edition of the work, based on this manuscript has been recently brought out by the University of Madras.

3. *Padārthasaṅgraha, D. No.* 15717.

This is a brief work summarizing the several categories and principles, as accepted in the *Dvaita* system of *Vedānta*. The work consists of seven chapters, viz., पदार्थनिरूपण, द्रव्यनिरूपण, गुणनिरूपण, सृष्टिनिरूपण, प्रलयनिरूपण, ज्ञाननिरूपण and मोक्षनिरूपण. The author, Vijayīndrabhikṣu, was one of the three gems, who adorned the Court of Śevappanāyaka (1535 A.D. to 1561 A.D.), the other two being Appayadīkṣita and Tātācārya. Thus the author belongs to the 16th century A.D. It is said that Vijayīndra has written another work known as *Madhvamatakaṇṭakoddhāra* in refutation of Appayadīkṣita's *Madhvamatavidhvaṁsana*, but the work is not yet traceable.

4. *Mīmāṁsānyāyakośa, D. No.* 15725.

This is a treatise on the *Pūrvamīmāṁsā*, explaining some select subjects relating to the *Prābhākara* school thereof. The author's name is not mentioned in the manuscript, but mention is made of his other work, namely, *Tarkaratna*. Besides, he mentions herein many works, viz., *Gurumatāmṛta*, *Vivaraṇa*, *Nibandhana*, *Nayaviveka*, *Prakaraṇapañcikā*, *Tripādī*, *Laghvī*, *Tattvāloka* and *Kalyāṇamañjarī*. He also mentions some authors by name, namely, Brahmanandin, Dramiḍācārya and Sunetra Nandanācārya. Unlike the other *Mīmāṁsakas*, he is in favour of accepting an Īśvara or a Universal Lord in the *Mīmāṁsaka* school of philosophy, a view, which was propounded by Vedāntadeśika in his *Seśvaramīmāṁsā*. He cites himself as one proficient in works of the two Nāthas, viz., Śālikanātha and Bhavanātha, the reputed authors of *Prābhākara* works, *Prakaraṇapañcikā* and *Nayaviveka*. In the beginning of the work the author cites the following passage as *Maṅgalavākya* :—

"नमः प्रवरगुणास्पदाय स्थिरत्रसकुलबीजकुम्भभूताय भुवनकोशस्य गोप्त्रे ब्रह्मणे । नमो जैमिनये वेदसंपुटनिगूढविष्फारयित्रे न्यायप्रज्वलिततेजसे ।"

And this passage is quoted as Dramiḍācārya's by Vedāntadeśika in his *Tattvaṭīkā*.

5. *Purāṇasāra, D. No.* 15731.

This is in *Purāṇic* style, containing 84 chapters dealing with select subjects that are usually dealt with in the *Purāṇas.* It thus forms a supplement to the 18 *Purāṇas.* The encyclopedic character of the subjects dealt with herein is apparent from the list of contents printed on pages 10388—90. The value of the work lies in its usefulness as a ready referencer to the several topics scattered over the various *Purāṇas.*

6. *Sāṅkhyasūtravārtika, D. No.* 15873,

This is an exposition of the *Sāṅkhya Sūtras* of Kapila. The author is Haribhaṭṭa. Nothing is known about the author besides his having the titles "Mahopādhyāya" and "Dvādaśāhāgnicit." The work is very rare, since no one seems to have referred to it so far, not even the *Catalogus Catalogorum.* The *Aniruddhavṛtti,* which is available in print, reads in some places the same lines as are found in this commentary; but this commentary reads more lines on the same subject than the *Aniruddhavṛtti.* Thus the *Aniruddhavṛtti* seems to be a summary of this commentary. It is a pity that the manuscript contains neither the beginning nor the end.

Besides the above, this volume contains the description of manuscript copies of the *Sthalamāhātmyas* of the following places:—

Sahyāmalaka (D. No. 15702), Kāñcīkṣetra (D. No. 15705), Vāmagavī (D. No. 15719), Śrīnivāsakṣetra (D. No. 15720), Mallāpura (D. No. 15721), and Nīlācala (D. No. 15975). These works have not been noticed in previous volumes of this catalogue. In addition to their appeal to pious people and to students of the history of South Indian

temples, these *Sthalamāhātmyas* contain some historical information, and are valuable to students of South Indian history for the picture of social and economic life found in them.

GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY,
5th March 1939.

P. P. SUBRAHMANYA SASTRI,
Curator.

CONTENTS.

SUBJECT INDEX.

Grammar.

Lexicography.

Purāṇas.

AUTHOR INDEX TO VOL. XXVIII OF THE DESCRIPTIVE CATALOGUE OF SANSKRIT MANUSCRIPTS.

GENERAL INDEX.

[NOTE. —The names printed in *italics* are those of the works described.]

A DESCRIPTIVE CATALOGUE

OF THE

SANSKRIT MANUSCRIPTS.

VOLUME XXVIII.

SUPPLEMENTAL.

No. 15693. सेतुबन्धः—सव्याख्यः.

SETUBANDHAḤ WITH COMMENTARY.

Substance, paper. Size, 10 × 8 inches. Pages, 300. Lines, 18 in a page. Character, Grantha. Condition, Good. Appearance, old.

Breaks off in the 10th Āśvāsa.

Same work as that described under R. No. 3226 of the Triennial Catalogue, Vol. IV, Part I—B. By Pravarasēna and Paśupati.

No. 15694. छन्दस्सूत्रम्, सभाष्यम्.

CHANDASSŪTRAM WITH BHĀṢYAM.

Substance, paper. Size, 12 × 10 inches. Pages, 112. Lines, 18 in a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Complete.

Similar to the work described under R. No. 10 of the Triennial Catalogue, Vol. I, Part I—A.

By Piṅgala and Yādavaprakāśā.

Beginning :

मयरसतजभनलगसंमितं प्रभृति वाङ्मयं जगति यस्य ।
स जयति पिङ्गलनागः शिवप्रसादाद्विशुद्धमतिः ॥
त्रिगुरुं विद्धि मकारं लघ्वादिसमन्वितं यकाराख्यम् ।
लघुमध्यमस्तु रेफं सकारमन्ते गुरुनिबद्धम् ॥
लघ्वन्तं हि तकारं जकारमुभयोर्लघुं विजानीयात् ।
आदिगुरुं च भकारं नकारमिह पैङ्गले त्रिलघुम् ॥
[स]दीर्घं संयोगपरं तथा प्लुतं व्यञ्जनान्तमूष्मान्तम् ।
सानुस्वारं च गुरुं क्वचिदवसानेऽपि लघ्वन्त्यम् ॥
॥ धीश्रीस्त्रीम् ॥

ओमित्यादिमन्त्रास्तन्निबन्धनानि प्रायेण वैदिकानि ।

॥ कर्मणि ॥

तें च छन्दःसूत्रे निबद्धाश्छन्दांसि चाविदुषा सन्मन्त्राः कर्मसु प्रयोक्तव्याः । तथा च ब्राह्मणम् । यो ह वा विनार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वाध्यापयति वा स्थाणुं वर्च्छति गर्तं वा पद्यते प्र वा मीयते पापीयान् भवति ।

* * * *

धीश्रीस्त्रीमिति । संज्ञा निदर्श्यते धीश्रीस्त्रीमिति गुरुवर्णत्रयं संज्ञि । एतच्च सर्वगुरोर्वर्णत्रयस्योपसंग्रहणायोदाहरणम् । तेन धीरित्यादेर्वाच्योर्थो न गृह्यते, प्रकृतानुपयोगाच्च । तेनेदमुक्तम्—सर्वगुरोस्त्रिकस्य वर्णगणस्य म इति संज्ञा ॥

End:

छन्दोज्ञानमिदं भवाद्भगवतो लेभे सुराणां गुरुः
तस्माद्दुश्च्यवनस्ततोऽसुरगुरुर्माण्डव्यनामा ततः ।
माण्डव्यादपि . . . . ततः पिङ्गल-
स्तस्येदं यशसा गुरोर्भुवि धृतं प्राप्यास्मदाद्यैः क्रमात् ॥ इति ।
इति साधु सायति तासीं तृणामिव यादवप्रकाशेन ।
कविदयितानां पिङ्गलशास्त्राद्वृत्तविधिरुज्जह्रे ॥

Colophon:

इति भगवतो यादवप्रकाशस्य कृतौ पिङ्गलनागच्छन्दोविचितिभाष्ये अष्टमोऽध्यायः समाप्तः ।

छन्दःशास्त्रमिदं पुरा त्रिनयनाल्लेभे गुहेनादित-
स्तस्मात्प्राप सनत्कुमारकमुनिस्तस्मात्सुराणां गुरुः ।
तस्माद्देवपतिस्ततः फणिपतिस्तस्माच्च सत्पिङ्गल-
स्तच्छिष्यैर्बहुभिर्महात्मभिरथो मह्यं प्रतिष्ठापितम् ॥

इति संपूणम् ।

The scribe adds—

जयाख्यवत्सरे ग्रन्थः छन्दोज्ञानप्रदः शुभः ।
मार्गशीर्षस्य पौर्णम्यां समाप्तोऽयं सनातनः ॥

No. **15695**. अथर्वणकारिकाः.

ATHRVAṆAKĀRIKĀ.

Substance, paper. Size, 12 × 10 inches. Pages, 22. Lines, 20 in a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Triliṅgaśabdānuśāsana 12*a*.

Incomplete.

Same work as that described under R. No. 5060 of the Triennial Catalogue, Vol. V, Part I—A.

By Atharvaṇācārya.

No. **15696**. सहचारवादः.

SAHACĀRAVĀDAḤ.

Substance, paper. Size, 13¾ × 8¼ inches. Pages, 164. Lines, 32 in a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Sāme work as that described under No. 4317 ante.

No. **15697**. प्रयोगरत्नम्.

PRAYŌGARATNAM.

Substance, paper. Size, 12 × 5½ inches. Pages, 296. Lines, 22 in a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Complete.

Same work as that described under No. 43 of M. Seshagiri Sastri's Report No. 1.

By Nārāyaṇabhaṭṭa.

No. **15698**. हरिभक्तिसुधोदयः.

HARIBHKTISUDHŌDAYAḤ.

Substance, paper. Size, 11 × 9 inches. Pages, 196. Lines, 18 in a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Complete.

Same work as that described under R. No. 1429(*f*) of the Triennial Catalogue, Vol. II, Part I—B.

No. **15699**. पञ्चेन्द्रोपाख्यानम्.

PAÑCĒNDRŌPĀKHYĀNAM.

Substance, paper. Size, 11 × 9 inches. Pages, 31. Lines, 18 in a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Subhadrāpariṇaya 16*a*.

Same work as that described under R. No. 2455(*c*) of the Triennial Catalogue, Vol. III, Part I—B.

Complete.

No. 15700. सुभद्राहरणचम्पूः.
SUBHADRĀHARAṆACAMPŪḤ.

Pages, 47. Lines, 18 in a page.

Begins on fol. 16*a* of the MS. described under the last No.

Complete.

Same work as that described under R. No. 2455(*d*) of the Triennial Catalogue, Vol. III, Part I—B, wherein see for the beginning.

End:

काले तत्राभिमन्युं तनयमजनयद्भद्ररूपं सुभद्रा
प्रत्येकं पाण्डवेभ्योऽप्यलभत तनयान् पञ्च पाञ्चालपुत्री ।
पञ्चाम्नायाः षडङ्गैरिव सुजनहितैस्ते कृतार्थाः सुतैस्तैः
षट्स्वप्येतेषु शब्दागम इव शुशुभे सर्वमान्योऽभिमन्युः ॥
ससात्यकिः सात्त्वतवंशवीरो लेभेऽर्जुनादूर्जितचापविद्याम् ।
हरिप्रियः सोऽपि च पाण्डवेभ्योऽप्यभूदलं पाण्डवपक्षपाती ॥

No 15701. विद्यानुशासनम्.
VIDYĀNUŚĀSANAM.

Substance, paper. Size, 11 × 9 inches. Pages, 154. Lines, 19 in a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Complete.

The subjects dealt with herein are apparent from the headings of the Samuddēśās given below :—

१. मन्त्रिलक्षणम्.
२. मन्त्रलक्षणविधानम्.
३. . . . .
४. सामान्यमन्त्रसाधनम्.
५. . . . .
६. गर्भोत्पत्तिविधानम्.
७. बालचिकित्साविधानम्.

Beginning:

मन्त्रस्येह यमाहुराद्यवयवं निस्तीर्णविद्यार्णवाः
प्रोक्तं येन शुभं च कर्म निखिलं कर्माशुभं चाखिलम् ।
शक्तिर्यस्य सुविस्मयैकनिलयः संप्राप्तसौख्यादयो
विद्यानामधिदेवतासु भवतां नस्सिद्धये सन्मतिः ॥

सर्वेयं मतिसागरस्य महतो मध्ये गभीराशये
मान्ति स्मागमपारगस्य पुरतो विद्यानुवादादयः ।
यद्वाङ्मन्त्रपदानि लोकमखिलं रक्षन्ति पूतान्यलं
तं वन्दे गणनायकं गुणनिधिं श्रीगौतमस्वामिनम् ॥

जयति श्रुतं भगवतो मुखाम्बुजा
दुदितं जनस्य सकलार्थवेदिनः ।
गणनायकैस्त्रिभुवनानि रक्षितं
करुणाधनैर्विरचितं महात्मभिः ॥

एकदा तं महावीरं देवं वैहारपर्वते ।
अप्राक्षीत्तं मुनिर्मान्यः सभायां गौतमो गणः ॥
आत्मप्रश्ने गणाधीशे पश्चिमस्तीर्थनायकः ।
व्याजहारार्थरूपेण समस्तागमविस्तरम् ॥
सार्वः सर्वज्ञदेशीयः परमः श्रुतकेवली ।
इन्द्रभूतिः स च ग्रन्थान् निखिलान् परमागमान् ॥
व्याचख्यौ च मुनीन्द्रेभ्यस्समस्तेभ्यस्सतां स तान् ।
हितोपदेशसद्धर्मयुक्तेभ्यो रक्षितुं जगत् ॥
ततः प्रभृत्यवच्छिन्नसम्प्रदायपरम्पराः ।
हितोपायाः प्रवर्तन्ते ते सर्वे परमागमाः ॥
तेषु विद्यानुवादाख्यो यः पूर्वो दशमो महान् ।
मन्त्रयन्त्रादिविषयः प्रथिते विदुषां मते ॥
तस्यांशा एव कतिचित्पूर्वाचार्यैरनेकधा ।
स्वां स्वां रुचिं समालम्ब्य कृताः परहितैषिभिः ॥
उद्धृत्य विप्रकीर्णेभ्यस्तेभ्यः सारं विरच्यते ।
ऐदंयुगीनानुद्दिश्य मन्दा(या) विद्यानुशासनम् ॥

End:

चैत्यालये ब्रह्मदेवमम्बिकां च यथाविधि ।
संपूज्य शान्ति सर्वेषां ग्रहाणां लभते नरः ॥
मान्त्रिकं स्वर्णवस्त्राद्यैरर्चयेद्भक्तिपूर्वकम् ।
न सिध्यति विधानेन कुत्रापि ग्रहमोक्षणम् ॥

Colophon:

इत्यार्षे विद्यानुशासने बालचिकित्साविधानं नाम सप्तमः समुद्देशः ।

No. 15702. सह्यामलकमाहात्म्यम्.
SAHYĀMALKAMĀHĀTMYAM.

Substance, paper. Size, 13½ × 8½ inches. Pages, 31. Lines, 25 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Kēralamāhātmya 32*a* Complete.

On the greatness of a holy place called Āmalaka Kṣētra in Sahya mountain. The place is called in Tamil "Tiru Nellisthala."

Beginning :

कारुण्यसारनिधये करुणाकराय
ताराधिनाथरमणीयमुखाम्बुजाय ।
हाराभिरामवपुषे हरये नमोऽस्तु
नारायणाय महितामलकालयाय ॥

सूतः—

श्रृणु पुण्यानि क्षेत्राणि स्थितो येषु सदा हरिः ।
नीलाया दक्षिणे भागे बिल्वाद्रिभुवि दुर्लभम् ॥
यत्र विष्णुर्जगन्नाथो नित्यं सन्निहितो हरिः ।
भार्गवेणात्र रामेण प्रतिमा स्थापिता पुरा ॥
यां दृष्ट्वा विप्र पापेभ्यः सर्वेभ्यो मुच्यते नरः ।
स्वयंभूः पश्चिमे तस्य देवस्तिष्ठति मुक्तिदः ॥
श्रीभूमिसहितस्तत्र शङ्खचक्रगदाब्जधृत् ।
तत्र तीर्थं महापुण्यं ख्यातं पापप्रणाशनम् ॥
तत्र स्नात्वा हरिं दृष्ट्वा मुच्यते सर्वबन्धनैः ।

* * * *

सूतः—

आसीदामलकस्तत्र तन्नाम्ना प्रोच्यते बुधैः ।
फलानि तस्य वृक्षस्य महान्ति सुरसानि च ॥
दर्शनीयानि दिव्यानि दुर्लभानि महामुने ।
सर्वेषां ब्रह्मणा पूर्वं वरेण ब्रह्मणा पुरा ॥
सकृद् दृष्टो महावृक्षो महाफलसमन्वितः ।
दृष्टमात्रे ततस्तस्मिंस्तिरोभावं जगाम सः ॥

End:

तत्क्षेत्रजाः पालनीया द्विजाग्र्याः ये वा तत्र क्षेत्रजातत्वभावान् ।
क्षीरं यथा गोषु तथैव नित्यं वृत्तावृत्ता लक्ष्यतां पार्थिवेन्द्र ॥
तत्क्षेत्रजा वृत्तिहीनाः कुशीला अव्यग्रास्ते ज्ञानतत्वाच्च तुल्याः ।
सत्यं सत्यं पूजनीया सुराणां श्रेयोऽर्थिनां किं पुनः पार्थिवानाम् ॥
एतत्ते कथितं विप्र ग्रामामालकसंज्ञितम् ।
तस्य क्षेत्रस्य माहात्म्यं तीर्थस्नानफलं तथा ॥

Colophon:

इति श्रीसह्यामलकग्राममाहात्म्ये अष्टमोऽध्यायः ।

No. 15703. केरलमाहात्म्यम्.
KĒRALAMĀHĀTMYAM.

Pages, 10. Lines, 25 in a page.

Begins on fol. 32*a* of the MS described under the last No.

Incomplete.

Same work as that described under No. 2393 ante.

No. 15704. स्वरमनोज्ञमञ्जरी.
SVARAMANŌJÑAMAÑJARĪ.

Substance, paper. Size, 11 × 9 inches. Pages, 143. Lines, 20 on a page. Character, Dēvanagarī. Condition, good. Appearance, old. Written on one side.

Complete.

Same work as that described under R. No. 1674 of the Triennial Catalogue, Vol. II, Part I—C. By Narasiṁhasūri.

No. 15705. काञ्चीक्षेत्रमाहात्म्यम्.
KĀÑCĪKṢĒTRAMĀHĀTMYAM.

Substance, paper. Size, 11 × 9 inches. Pages, 272. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete.

Deals with the sanctity and religious importance of **Kāñci** Conjeevaram).

The subjects dealt with herein are given below :—

१. वसिष्ठादिमहर्षिगणकृतमुक्त्युपायादिचिन्ताकथनम्.
२. वराहवल्मीकवराहपल्वलवराहमहिमझिल्लिकावनवृद्धाचलादिकथानुवर्णनम्
३. गुहानृसिंहोपाख्यानम्.
४. क्षेत्रमहिमानुवर्णनम्.
५. तीर्थप्रशंसा.
६. Do.
७. भगवत्साक्षात्कारार्थं प्रयागक्षेत्रेऽश्वमेधेन यजतो विधेरशरीरवाचा सत्यव्रतक्षेत्रगमनोद्योगकथनम्.
८. ब्रह्मणः अश्वमेधप्रारम्भः.
९. श्रीशार्ङ्गधरविष्णुप्रादुर्भावः.
१०. दीपप्रकाशाष्टभुजशरभेशप्रादुर्भावविवर्णनम्.
११. ब्रह्माश्वमेधं प्रति कोपात् सरस्वत्यनागमनतत्कोपकारणादिकथनम्.
१२. ब्रह्माश्वमेधविध्वंसकमहाप्रवाहरूपसरस्वतीनिरोधनार्थं श्रीशयनेशश्रीप्रलयरोधकश्रीयथोक्तकारिप्रादुर्भावप्रतिपादनम्.
१३. श्रीवरदप्रादुर्भावः.
१४. ब्रह्माश्वमेधसमाप्तिः.
१५. त्रिमूर्तिषु शुद्धसत्त्वमयपरतत्त्वनिर्धारणप्रवृत्तभृगुचरित्रकथनम्.
१६. सर्पाकारविष्णुप्रादुर्भावः.
१७. श्रीवामनश्रीशेषाकारश्रीमेघाकारश्रीत्रिविक्रमभगवद्दिव्यावतारकथनम्.
१८. भृगवेस्थानत्रयप्रदर्शनश्रीसुधाकरप्रवालवर्णहेमवर्णभगवत्प्रादुर्भावकथनम्
१९. भृगुपुत्रीत्वेन लक्ष्मीप्रादुर्भावश्रीवरदराजकृततत्पाणिग्रहणादिकथनम्.
२०. पार्वत्याः शिवशापप्राप्तिपूर्वकं काञ्चीपुरकामकोष्ठनिलयश्रीवामनसान्निधिप्राप्तिकथनम्.
२१. शिवनेत्राग्निसन्तापितपार्वतीसन्तापं शमयितुं श्रीचन्द्रखण्डविष्णुप्रादुर्भावकथनम्
२२. कामाक्षीपूजितसैकतलिङ्गादेकाम्रनाथप्रादुर्भावकथनम्.
२३. पार्वतीशापवशादमङ्गलायै गङ्गायै वरदानार्थमाकाशे गरुडारूढभगवत्प्रादुर्भावकथनम्.

२४. गङ्गाशापविमोक्षणसर्वतीर्थमहिमानुवर्णनस्वब्रह्मोत्सवार्थभगवदादेशादि-
कथनम्.

२५. विश्वकर्मकृतप्रतिमालये भगदाविर्भावब्रह्मकृतवैशाखोत्सवादिकथनम्.

२६. श्रीपाण्डवदूतप्रादुर्भावकथनम्.

२७. श्रीकैलासेश्वरश्रीवैकुण्ठनाथप्रादुर्भावकथनम्.

२८. मल्लिकोपाख्यानबृहस्पतिशापमोक्षणक्षीरनदीप्रादुर्भाववृषभेश्वरकोटीश्वर-
शान्तेश्वरचरित्रकथनम्.

Beginning:

कदाचिन्नैमिशारण्ये पुण्यक्षेत्रे समागताः ।
शौनकाद्या महाभागा ऋषयस्संशितव्रताः ॥
बोधायनो मुञ्जकेशो नारदः कण्वकाश्यपौ ।
कात्यायनो गौतमश्च ऋषिर्दाण्डायनोष्टकः ॥
भारद्वाजो यवक्रीतो जैमिनिः पैल एव च ।
वसिष्ठो वामदेवश्च जाबालिरथ काश्यपः ॥
याज्ञवल्क्यः पञ्चतपा अष्टावक्रः सुशृङ्गणः ।
एते चान्ये च मुनयो हंसाः संन्यासिनोऽपरे ॥
यजन्तो विविधैर्यज्ञैर्विष्णुमव्यक्तरूपिणम् ।
ध्यायन्तः पूजयन्तश्च सर्वकैवल्यकाङ्क्षिणः ॥
एकदा समासीनाः सर्वे प्रयतमानसाः ।
वेदशास्त्रार्थतत्त्वज्ञाः प्राज्ञाः प्रोचुः परस्परम् ॥
केनैव कर्मणा नृणां भवेन्मुक्तिप्रदो हरिः ।
यज्ञेन तपसा वाथ किं वा दानेन यात्रया ॥

* * * *

तेषु पुण्यतमा काञ्ची कलिकल्मषनाशनी ।
स्मरणान्मुक्तिदा नृणां किमु तत्र निवासिनाम् ॥
तत्र संनिहितो विष्णुर्गुहायां हस्तिभूभृतः ।
तत्र विष्णुं समुद्दिश्य यत्किञ्चिदपि मानवः ॥
स्नानदानादिकं कर्म कुर्वन् मुक्तिमवाप्नुयात् ।
वं मया पङ्कजजन्मनो मुखात् भूतेन पूर्वं कथितं द्विजाग्र्याः ।
काञ्चीनिवासः कलिकल्मषापहः करोति जन्तून् कमलेशपार्श्वगान् ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे काञ्चीक्षेत्रमाहात्म्ये वसिष्ठादिमहर्षिगणकृतमुक्त्युपायादिचिन्ताकथनं नाम प्रथमोऽध्यायः ।

End:

सर्वमेतन्मया प्रोक्तं काञ्चीमाहात्म्यमद्भुतम् ।
शृण्वतां सर्वपापघ्नमायुरारोग्यवर्धनम् ॥
य इदं पठते नित्यं शृणोति च समाहितः ।
स सर्वान् लभते कामानायुरारोग्यमेव च ॥

सूतः—

इत्युक्त्वा नारदो विद्वान् राज्ञा हृष्टेन पूजितः ।
अम्बरीषमनुज्ञाप्य जगाम त्रिदशालयम् ॥
एतत्सत्यव्रतक्षेत्रमाहात्म्यं पुण्यवर्धनम् ।
पापघ्नं मोक्षफलदं भवद्भ्यः कथितं मया ॥
एतत् सुपुण्यं पुरुषार्थसाधकं सत्यव्रतक्षेत्रगतस्य विष्णोः ।
माहात्म्यमत्यद्भुतमादरेण श्रुत्वातिहृष्टा मुनयो बभूवुः ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे अम्बरीषनारदसंवादे श्रीकाञ्चीक्षेत्रमाहात्म्ये पल्लिकोपाख्यानबृहस्पतिशापमोक्षणक्षीरनदीप्रादुर्भाववृषभेश्वरपुण्यकोटीश्वरशान्तेश्वरचरित्रकथनं नाम सप्त(अष्ट)विंशोऽध्यायः ।

श्रीकाञ्चीक्षेत्रमाहात्म्यं संपूर्णम् ।

No. 15706. पाणिनिसूत्रविवृतिः.
PĀṆINISŪTRAVIVṚTIḤ.

Substance, paper. Size, 11 × 9 inches. Pages, 275. Lines, 20 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old. Complete.

A metrical explanation of Pāṇini's Sūtras by a native of Malabar.

Beginning:

नत्वा मुनिकुलं वाणीं विनायकमुमापतिम् ।
हरदत्तं हरिं भूयो जयादित्यं च वामनम् ॥

कैयटादीन् गुरून् भक्त्या तत्प्रसादान्मयाधुना ।
सूत्राणां पाणिनीयानां विवृतिः क्रियते मनाक् ॥
अनुवादाय सूत्राणां तत्क्रमेण विलिख्यते ।
तदन्वयोदाहरणमात्रमत्र पुनः क्वचित् ॥
उदाहारोऽन्वयेनोह्यमुदाहृत्यान्वयः क्वचित् ।
प्रायेण खलु सर्वत्र लिख्यते तद्वयं पुनः ॥
वृत्तिरत्नमिदं येन काशिकाब्धेः समुद्धृतम् ।
तेनैव क्रियते भूयो वृत्तिरेषा लघीयसी ॥
लघीयस्त्वेन सुधरं करश्रुतिमनस्स्थिरम् ।
शब्दानुशासनं बालैरित्यालोच्य यतामहे ॥
चतुर्दशादौ सूत्राणि दर्शितानीह शम्भुना ।
प्रत्याहाराय तैरत्र प्रत्याहाराः स्तुता इमे ॥
चत्वारिंशत्ततो द्वौ च शास्त्रमेतत्तदात्मकम् ।
प्रत्याहारस्थितिश्चादिरन्त्यनेति च वक्ष्यते ॥
इत्संज्ञा चोपदेशेऽजित्यादिभिर्दर्शयिष्यते ।
तत्र त्वाद्येन सूत्रेण प्रत्याहारोऽणिति स्मृतः ॥

End :

वृत्तावस्यां लघीयस्यामध्याये पुनरष्टमे ।
तुरीयश्चरणः प्रायात् पद्यैः शैलाब्धिभिर्मितः ॥

उज्जह्रे पाणिनीयस्मृतिविषयमिदं काशिकागाधसिन्धोः
साधीयो वृत्तिरत्नं लघु धिषणमनोहारि सद्वृत्तरम्यम् ।
योऽसौ भूयोऽपि रामस्मृतिदलितसमस्ताशुभो रामशालि-
क्षेत्रावासीह कश्चित् व्यधित लघुतरां वृत्तिमेनां द्विजन्मा ॥
हृद्यैः पद्यैरुदारां लघुमतिरमणीं पाणिनीयस्य लघ्वीं
वृत्तिं द्रागारचय्य क्षितिगगनवियच्चन्द्रशीतांशुमानाम् ।
भूयो लघ्वीं ततोऽपि स्फुटविषयपदार्थाशयां रामशालि-
क्षेत्रावासी द्विजन्मा समररचदिमां खाश्विशैलाश्विमुद्राम् ॥
भाष्यादौ विप्रकीर्णं बहुविधमखिलं तन्त्रमेतद्विपाश्चित्
संगृह्यैकत्र हस्तामलकमिव पुरोऽदर्शयत् काशिधामा ।

तत्तादृक्पद्यबृन्दैः प्रथममथ लघूकृत्य तद्ग्रामशालि-
क्षेत्रावासी विपश्चित् समलल्लघुकरत्केरलेषु द्विजन्मा ॥
भूत्यै स्यादिन्दुमौलिर्जयति स भगवान् पाणिनिर्विश्ववन्द्यो
जीयात् कात्यायनोऽसौ दिशतु मम शुभं भाष्यकृद्योगिराजः ।
दद्याद्भद्रं दयालुर्हरिरमितमतिः कैयटः कामदायी
भूयान्मूर्त्यन्तमास्ते गुरव इह मम श्रेयसे भूयसे स्युः ॥
पाणिनिवररुचिफणिनो हरिहरदत्तौ हरो जयादित्यः ।
वामनकैयटभोजाः शास्त्रकृतो मे प्रसीदन्तु ॥
निशाचरतमोलीनजगदुन्मेषहेतवे ।
जानकीजानये तस्मै तेजसां निधये नमः ॥

Colophon:

लघुवृत्तिकारिका संपूर्णा ॥
शेषोऽयं चतुरर्थान्तादपत्यादेरिहापरः ।
तत्र जातादिरूपेऽर्थे तद्धिताः स्युरितः परे ॥
इति वृत्तौ लघीयस्यामस्ति तस्यार्थ उच्यते ।
आञ्जस्यं नास्ति चेदस्य संनिरूप्य विशोध्यताम् ॥

* * * *

स्रुघ्ने जातः स्रौघ्न इति राष्ट्रे जातस्तु राष्ट्रियः ।
स्रुघ्ने कृतो वा लब्धो वा क्रीतो वा कुशलोऽपि वा ॥
स्रौघ्नस्तथैव राष्ट्रे तु कृताद्यर्थेषु राष्ट्रियः ।

No. 15707. सर्वतोभद्रचक्रम्—द्राविडटीकासहितम्.

SARVATŌBHADRACAKRAM WITH TAMIL MEANING.

Substance, paper. Size, 11 × 9 inches. Pages, 53. Lines, 20 on a page. Character, Grantha and Tamil. Condition, good. Appearance, old.

Complete.

Same text as that described under No. 14002 ante and with Tamil meaning.

No. 15708. तत्त्वानुसन्धानम्.
TATTVĀNUSANDHĀNAM.

Substance, paper. Size, 11 × 5 inches. Pages, 80. Lines, 10 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Complete.

Same work as that described under R. No 2509 of the Triennial Catalogue of MSS., Vol. III. By Mahādēvasarasvatī.

No. 15709. त्रिलिङ्गशब्दानुशासनम्.
TRILIṄGAŚABDĀNUŚĀSANAM.

Pages, 9. Lines, 20 in a page.

Begins on fol. 12*a* of the MS. described under No. 15695 ante.

Complete in 10 Kāṇḍās.

A treatise on Telugu grammar written in Sanskrit.

By Atharvaṇācārya.

Beginning:

जयति प्रसिद्धलोके सर्वलक्षणलक्षितम् ।
शब्दं त्रिलिङ्गशब्दानामथर्वणकवेः कृतिः ॥
शब्दब्रह्मेति विख्यातश्चोभयो . . . . . ।
. . . . चतुर्वेदविदां वरः ॥
करोमि शब्दं शब्दानां त्रिलिङ्गानां च लक्षणम् ।
बार्हस्पत्यादि सर्वाणि काण्वं व्याकरणं विदन् ॥
नानाविधप्रयोगांश्च ज्ञात्वा विविधभक्तिकान् ।
आन्ध्रे संस्कृतमर्यादाभिज्ञैः साधु विचारितान् ॥
करोम्याथर्वणं शब्दं सर्वलक्षणलक्षितम् ।
ज्ञात्वा बहूनि बहुषु बहुधा बहुभिर्बहु ॥
हेमचन्द्रादिमुनिभिः कथितं चान्ध्रलक्षणम् ।
अथ वक्ष्यामि सूत्राणि प्रयोगानुसारेण वै ॥
रामादि प्रातिपदिकं नामेति च निगद्यते ।
कविविन्यादयः सर्वे धातवश्च क्रियास्त्वमी ॥
डुङाद्याश्च प्रत्ययाः स्युः संज्ञा ज्ञेया बुधेश्वरैः ।

* * * *

Colophon:

इति श्रीचतुःषष्टिकलाधुर्याथर्वणाचार्यविरचिते त्रिलिङ्गशब्दानुशासने प्रथमकाण्डः ।

End:

कृदन्ता अथ उच्यन्ते दिङ्मात्रेण प्रदर्शनम् ।
सुट्तोद्भाभावतत्वादश्चकर्तरिचेष्यते ॥
शान्तानां यो हि चान्तानां सुश्रुवश्च काचत् काचत् ।
वेटशौ शुनकूणश्चडुश्च इत्याद्याः प्रत्यय व्याः ॥

स्मृताः ।

बालानामृजुबोधार्थं संग्रहः कृत एव हि ।
एवं धातोः प्रत्ययस्तु कर्तव्यः सानुबन्धकः ॥

Colophon:

इति चतुःषष्टिकलाधुर्याथर्वणाचार्यविरचिते त्रिलिङ्गशब्दानुशासने दशमः काण्डः ॥

No. **15710.** कणादसिद्धान्तचन्द्रिका.
KAṆĀDASIDDHĀNTACANDRIKĀ.

Substance, paper. Size, $8\frac{1}{3} \times 6\frac{2}{3}$ inches. Pages, 140. Lines, 16 on a page. Character, Grantha. Condition, good Appearance, old.

Complete.

Same work as that described under R. No. 57 of the Triennial Catalogue, Vol. I, Part I—A; but with colophon and a few additional stanzas as given below. By Gaṅgādharasūri.

अनया विशदीभूते न्यायवैशिषिकाध्वनि ।
निर्विशङ्कं सञ्चरन्तु बाला व्युत्पत्तिकाङ्क्षिणः ॥

Colophon:

इति श्रीसकलविद्यानिधानगङ्गाधरसूरिविरचिता कणादसिद्धान्तचन्द्रिका समाप्ता ॥

वन्दारुजनमन्दारं वारिजासनपूजितम् ।
गङ्गाधरं ललाटाक्षं भजे मध्यार्जुनेश्वरम् ॥

वाग्देवतायै नमः ।

गङ्गाधराख्यमखिना बालव्युत्पत्तये कृता ।
समाप्तिमधुना याता तर्कसिद्धान्तचन्द्रिका ॥

No. **15711**. रसभेषजकल्पदीपिका.
RAṢABHĒṢAJAKALPADĪPIKĀ.

Substance, paper. Size, 8¼ × 6½ inches. Pages, 115. Lines, 12 on a page. Character, Telugu Condition, good. Appearance, old.

Complete.

Same work as that described under No. 13195 ante.

No. **15712.** सन्तानदीपिका.
SANTĀNADĪPIKĀ.

Pages, 33. Lines, 8 in a page.

Begins on fol. 1*a* of the MS. described under No. 13040 ante.

Complete.

A work on astrology dealing with the methods of determining whether a person will beget sons or not, the number of sons he may beget and the propitiatory rites that one has to perform in order to beget sons.

Beginning :

नत्वा गजाननं पूर्वं सद्गुरून् समुपास्य च ।
विधातुर्वन्दनं कृत्वा वाग्देव्याश्च विशेषतः ॥
शङ्करो विष्णुमभ्यर्च्य संपूज्य च नवग्रहान् ।
वासुदेवं गुरून् ध्यात्वा वक्ष्ये सन्तानदीपिकाम् ॥
वराहहोरामालोक्य तथा जातकपद्धतिम् ।
सारावलिं ततो दृष्ट्वा पराशरमतं तथा ॥
त्रप्रश्नशास्त्राणि चान्यानि समालोक्य मुहुर्मुहुः ।
नराणां चानपत्यत्वं दत्तपुत्रादिलक्षणम् ॥
पुत्रशोक त्वपुत्रत्वं बहुपुत्रत्वमुच्यते ।
गुरुलग्नेशदारेशपुत्थ नाधिपेषु च ॥
सर्वेषु बलहीनेषु वक्तव्या त्वनपत्यता ।

End:

व्ययेशे रन्ध्रगे षष्ठे रन्ध्रेशे व्ययसंस्थिते ।
धनधान्यसमृद्धिं च प्रवदेन्मतिमान् नरः ॥
सन्तानदीपिकाशास्त्रमेकविंशोत्तरेण तु ।
शतेन श्लोकजातेन संमितं गृह्यतामिदम् ॥

Colophon:

सन्तानदीपिका समाप्ता ॥

No. **15713**. रूपावतारव्याख्या.
RUPĀVATĀRAVYĀKHYĀ.

Substance, paper. Size, 8 × 6½ inches. Pages, 524. Lines, 14 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

A commentary on the grammatical work Rūpāvatāra of Dharmakīrti, described under No. 1332 ante.

Incomplete.

Beginning:

अभित्तिलोकी नालीकमाम्नायितमवन्ति ये ।
तेभ्यः कल्याणहेतुभ्यो भूदेवेभ्यो नमो नमः ॥
अभिगतषडभिज्ञप्रक्रियोऽपि स्वयं यः
प्रथमसमयसज्जद्वासनावासितात्मा ।
अकलयद्रतिहृद्यं शब्दविद्यानुमोदं
स जयति नवकार्तिः सन्मतो धर्मकीर्तिः ॥
अमुष्य हृदि(पद) वारिधिप्रातिनिधेः कृते व्याकृतौ
कथं भवति योग्यता लघुरपीदृशां मादृशाम् ।
चिरान्महदनुग्रहादिह तु लब्धवाणीलवा-
ननुस्मरणहेतवे लिखितयाम्य(वान)हं केवलम् ॥
अत्र रूपावतारस्य पाठेषु विविधेष्वपि ।
एकस्यैव प्रयत्नोऽयमनुवृत्त्यै वितन्यते ॥

ग्रन्थारम्भे ग्रन्थकृन्मङ्गलार्थं प्रसिद्धरसिकत्वात् लौकिकस्मृत्या परमाचार्यं नमस्यति—येनाक्षरसमाम्नायमिति । अक्षराणां विशिष्टक्रमपाठोऽक्षरसमाम्नायः, देवसूत्राणि, प्रत्याहारसूत्राणीति यावत् । यथ कणाद-

मुनिराखिलविद्याप्रथमभूमेर्भगवतो भवानीवल्लभात् प्रतिष्ठाक्षराण्यधिगम्य वैशेषिकदर्शनं चकार, तथाऽयमपि तत्रभवान् दाक्षीनन्दनस्तस्माद्देवादक्षरसमाम्नायमधिगम्य व्याकरणं प्रणिनाय । कृत्स्नं प्रतिपाद्येन समग्रं तच्च सकलशब्दौघस्वरलिङ्गात्मकम् । अथ निजाचार्यप्रणामपुरस्सरं श्रोतृजनप्रवृत्तये क्रियमाणं वस्तु निर्दिशति —सर्वज्ञमिति । सर्वज्ञो बुद्धमुनिः । गुणाः सत्यार्जवज्ञानशौचतितिक्षादयः । प्रणम्य प्रकर्षेण नत्वा । नतेः प्रकर्षो भक्तिशालिता । बाला इव बाला अज्ञाः शब्दानभिज्ञा व्युत्पाद्याः । न तु स्तनपिबाः । बालशब्देनाज्ञानामभिधानमेते बालवत् सस्नेहं व्युत्पादनीया इति प्रदर्शनार्थम् । रूपावतारं शब्दानां प्रकृतिप्रत्ययविभागसिद्धिम् । अनेनेव शब्दाः साधुशब्दा इति सिद्धं भवति ।

End:

परस्याभिनिर्वृत्तं पूर्वस्याप्यभिनिर्वृत्तमेव । न चाभिनिर्वृत्तस्य प्रतिषेधेन निवृत्तिः शक्या । अथ पूर्वस्यानभिनिर्वृत्तं परस्याप्यनभिनिर्वृत्तमेव ।

* * * *

तदधीते च तद्वेद तदस्मिन्नस्ति देशके ।
तेन निर्वर्तितं तस्य निवासो दूरतो भवः ॥
अधिकारा इमे प्रोक्तास्त्रयोविंशतिरत्र हि ।
इत ऊर्ध्वंत्वा विकारादधिकारास्तु शषिकाः ॥

No. **15714.** कृष्णयजुस्संहिताभाष्यसंग्रहः.

KṚṢṆAYAJUSSAṀHITĀBHĀṢYASAṄGRAHAḤ.

Substance, paper. Size, 11 × 8¾ inches. Pages, 378. Lines, 20 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

A summary of the commentaries on the Kṛṣṇayajurvēda.

Contains from the 5th Kāṇḍa without beginning to the end of 10th Anuvāka of the 4th Praśna of the 7th Kāṇḍa.

By Vēṅkaṭēśa.

Beginning:

. . . . होमं विदधाति । सावित्राणीति । सावित्राणि जुहोति—

सावित्रैः मन्त्रैरेकामाहुतिं जुहोति । मन्त्रबहुत्वाभिप्रायं बहु . . . प्रसूत्यै अनुज्ञानाय । सवित्रानुज्ञातं यथा स्यादिति । चतुर्गृहीतेनेत्यादि गतम् । चत्वारि छन्दांसीति । गायत्रीत्रिष्टुब्जगत्यनुष्टुब्रूपाणि वयं युष्माकं भागानि वयं हव्यं च वयं न वक्ष्याम इति । देवेभ्यः सकाशाद्पाक्रामन् । तेभ्यः छन्दोभ्य एतच्चतुर्गृहीतमधारयन् । छन्दोत्थं पर्यकल्पयन् ।

* * * *

Colophon:

इति नैध्रुवश्रीवेङ्कटेशविरचिते वेदार्थसंग्रहे पञ्चमे काण्डे प्रथमप्रपाठके एकादशानुवाकः । समाप्तश्च प्रपाठकः ।

End:

उत्तरमाह—सौभरमिति । तृतीयसवने उक्थ्यपर्याये सौभरं नाम ब्रह्मसामं भवति, बृहत् बृहत् गेयं तत्साममध्य . . . . धारणात् विजित्य भवति । तेनाजामि । इत्थमजामित्वं सम्पद्यते ।

Colophon:

सप्तमचतुर्थे नवमोऽनुवाकः ॥

अथाभिप्लवषडहविधिः—ज्योतिष्टोममिति । ज्योतिष्टो . . . . . . तृतीयोऽपि तेन पृथिव्यादिलोकत्रयप्राप्तिर्भवति । इयं वावेति ।

* * * *

अत एव मुच्यन्ते चक्रत्वेन षडहं वर्णयति—अग्निष्टोमाविति । अग्नि ।

No. **15715.** प्रपञ्चहृदयम्.

PRAPAÑCAHṚDAYAM.

Substance, paper. Size, 11 × 9 inches. Pages, 116. Lines, 20 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are: Cakralēkhanaprakāśa 58*a*. Laghudharmaprakāśikā 61*a*.

Complete.

Contains the following Prakaraṇas.—

१. तनुभुवनप्रकरणम्.
२. वेदप्रकरणम्.
३. षडङ्गप्रकरणम्
४. उपाङ्गप्रकरणम्.
५. उपवेदप्रकरणम्.
६. षड्दर्शनप्रकरणम्.
७. ज्ञानप्रकरणम्.
८. योगप्रकरणम्.

Beginning:

लोकदेहादिकार्याणां कारणस्यादिकारणम्।
प्रपञ्चहृदयाधारं तं नमामि सदा हरिम्॥

अथाशेषपुरुषार्थशेषतया सकलः प्रपञ्चोऽयमिह प्रदर्श्यते। स तु त्रिविधः—वेद्यविद्यावेत्तृप्रपञ्चभेदेन। तत्र वेद्यप्रपञ्चोऽपि पुनर्द्विविधः—तनुभुवनभेदेन। तत्र तनुर्द्विविधा—स्थावरजङ्गमभेदेन। तत्र जङ्गमशरीरं त्रिविधम्—सुरनरतिर्यग्भेदेन। तत्र सुरदेहोऽष्टविधः—देवपितृयक्षराक्षसनागगन्धर्वभूतपिशाचभेदेन। एष्वेवान्तर्भूताः किन्नरचारणसिद्धविद्याधरादयः। मनुष्यशरीरमेकविधम्। तिर्यग्देहः पशुमृगपक्षिसरीसृपभेदेन चतुर्विधः।

* * * *

Colophon:

इति प्रपञ्चहृदये तनुभुवनप्रकरणं नाम प्रथमं समाप्तम्।

* * * *

तत्र साङ्गोपाङ्गवेदस्य पूर्वोत्तरकाण्डसंभिन्नस्याशेषवाक्यार्थविचारणपरायणं मीमांसाशास्त्रम्। तदिदं विंशत्यध्यायनिबद्धम्। तत्र षोडशाध्यायनिबद्धं पूर्वमीमांसाशास्त्रं पूर्वकाण्डस्य धर्मविचारपरायणं जैमिनिकृतम्। तदन्यदध्यायचतुष्कमुत्तरमीमांसाशास्त्रम् उत्तरकाण्डस्य ब्रह्मविचारपरायणं व्यासकृतम्। तस्य विंशत्यध्यायनिबद्धस्य मीमांसाशास्त्रस्य कृतकोटिनामभाष्यं बोधायनेन कृतम्। तत् ग्रन्थबाहुल्यभयादुपेक्ष्य किञ्चित्संक्षिप्तमुपवर्षेण कृतम्। तदपि मन्दमतीन् प्रति दुष्प्रतिपादं विस्तीर्णत्वादित्युपेक्ष्य षोडशलक्षणपूर्वमीमांसाशास्त्रमात्रस्य देवस्वामिनातिसंक्षिप्तं कृतम्। भवदासेनापि कृतं जैमिनीयभाष्यम्। पुनर्द्विकाण्डे धर्ममीमांसाशास्त्रे पूर्वस्य तन्त्रकाण्डस्याचार्यशबरस्वामिनातिसंक्षेपेण सङ्कर्षकाण्डं द्वितीयमुपेक्ष्य कृतं भाष्यं मीमांसाशास्त्रस्य।

End:

सन्तापयति स्वं देहमापादतलमस्तकम् ।
ब्रह्मैवासौ भवेदात्मा न पुनर्जन्मभाग्भवेत् ॥
नानाविज्ञानजननं विद्वज्जनमनोहरम् ।
प्रपञ्चहृदयाख्यं हि प्रपञ्चोत्तमभूषणम् ॥
सम्यग् ज्ञानप्रदं शश्वदज्ञानां सर्ववस्तुषु ।
अप्रकाश्यमिदं तन्त्रं संसारवनदाहकम् ॥

Colophon:

इति प्रपञ्चहृदये योगप्रकरणं नामाष्टमं समाप्तम् ।
प्रपञ्चहृदयं समाप्तम् ॥

No. **15716.** प्रमाणलक्षणम्.
PRAMĀṆALAKṢAṆAM.

Pages, 56. Lines, 18 in a page.

Begins on fol. 21*a* of the MS. described under No. 5283 ante.

By Sarvajñātman disciple of Dēvēśvara.

A work on Pramāṇas or the valid means of acquiring true knowledge according to Jaimini's system.

Complete.

Beginning:

प्रणम्य विष्णुं जगतः परायणं पुराणमाचार्यपरम्परागतम् ।
शिशुप्रबोधाय मयाभिधीयते प्रमाणसामान्यविशेषलक्षणम् ॥

अस्योत्थानं तस्य निमित्तपरीष्टिरिति सूत्रपाठे परिपठितं परीष्टिसूत्रं, सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमिति च प्रत्यक्षसूत्रम् । तयाेर्वृत्तिकारमतेनावतरणप्रकारस्तावत् प्रदर्श्यते । तदर्थनिर्णयार्थत्वादस्य प्रकरणस्योत्थानं स्वयमेव दर्शितं भविष्यतीति चोदनालक्षणोऽर्थो धर्म इति निमित्तनैमित्तिकप्रतिज्ञा कृता निमित्तं प्रमाणम्, नैमित्तिकं प्रमेयम् । तच्चैतद्रूपं धर्मब्रह्मणोः प्रमेयभूतयोः । चोदनासमन्वययोश्च प्रमाणभूतयोः शास्त्रविशेषयोः साधारणम् ।

* * * *

प्रमासाधनं प्रमाणम् । प्रमाग्रहणं प्रमाभासनिरासार्थम् । संशयविप-र्ययतर्कानध्यवसायविकल्पानुवादस्मृतयः प्रमाभासाः । संशयादिषु भावव्यु-त्पत्तिरिह फलस्य विवक्षितत्वात् ।

End:

एतन्मया सकलजैमिनितन्त्रवस्तु
सम्यङ् निरूप्य तदबाधनवर्त्मनैव ।
तस्योपबृंहणतया कथितं प्रमाण-
सामान्यभेदगतलक्षणमादरेण ॥
श्रीदेवेश्वरपादपद्मरजसा सद्यः पवित्रीकृतः
सर्वज्ञात्ममहामुनिः प्रकरणं चक्रे त्रिकाण्डीगतम् ।
यस्त्वेतत्पुरुषोऽवगच्छति स वै भूमण्डले पण्डित-
स्तद्वत्तार्किकदुर्विदग्धदमने दक्षो मुमुक्षुर्भवेत् ॥

श्रीश्रेष्ठानन्दपादशिष्याः श्रीदेवानन्दपादाः, श्रीदेवानन्दपादशिष्याः श्रीदेवेश्वरपादाः, श्रीदेवेश्वरपादशिष्याः श्रीसर्वज्ञात्मपादाः, तदीया कृतिः ।

Colophon:

प्रमाणलक्षणं समाप्तम् ॥

No. **15717.** पदार्थसंग्रहः.

PADĀRTHASAṄGRAHAḤ.

Pages, 41. Lines, 20 in a page.

Begins on fol. 49*a* of the MS. described under No. 5288 ante.

Complete.

An enumeration of categories according to the Dvāita system of philosophy.

By Vijayīndrabhikṣu.

Beginning:

लक्ष्मीपतिं संप्रणम्य सर्वतोऽथ गुरूनपि ।
पदार्थानां संग्रहो यः क्रियते शास्त्रतोऽञ्जसा ॥

द्रव्यगुणकर्मसामान्यविशेषविशिष्टांशिशक्तिसादृश्याभावभेदात् दश प-दार्थाः । तत्र द्रव्याणि—परमात्मलक्ष्मीजीवाव्याकृताकाशप्रकृतिगुणत्रयमहत्त-त्त्वाहङ्कारतत्त्वबुद्धिमनइन्द्रियमात्राभूतब्रह्मांशाविद्यावारणान्धकारवासनाकालप्रति-

* * * *

अत्र प्रपञ्चभिन्नमित्येवोक्तौ मायावादिनामपि प्रपञ्चब्रह्मणोः व्यावहारिकभेदाङ्गीकारात् तादृशभेदवतः ब्रह्मणो मन्मतेऽपि विषयत्वपरिहाराय परमार्थतोभिन्नमित्युक्तम् । भेदाभेदवादिनः त्रिविधाः । जीवब्रह्मणोः केवलं संसारे भेद एव मुक्तावभेद इति केचित् ।

End:

भगवान् टीकाकारः अन्तेऽपि मङ्गलमाचरति—वचनेति । यथा केनचिद्भिक्षुणा रचिता पुष्पमाला ऐश्वर्यवन्तं पुरुषं प्र . . सति । तेन तद्दयया हृदि ध्रियते इत्यर्थः । सदये दयया सहिते । कमलेति महिला प्रियेत्यभिमानात् । कमला महालक्ष्माः महिला वनिता यस्यासौ तथोक्तस्तेनेत्यर्थः ।

यादवार्यहृदम्भोजजातः श्रामध्वहृद्गतः ।
वासवीसूनुरमला प्रीयतां बादरायणः ॥

Colophon:

इति श्रीमद्यदुपत्याचार्यपूज्यपादाराधकेन श्रीनिवासेन विरचिता मायावादखण्डनपञ्चिका समाप्ता ॥

No. **15719.** वामगवीमाहात्म्यम्.
VĀMAGAVĪMĀHĀTMYAM.

Substance, paper. Size, 11 × 8¾ inches. Pages, 27. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 1*a* The other works herein are Śrīnivāsakṣētramāhātmya 20*a*. Mallāpurakṣētramāhātmya 31*a*.

Deals with the greatness of the place Vāmagavī (Tiruviḍandai) near Mahābalipuram; taken from the Vāmanapurāṇa.

Beginning:

मुनयः—

व्यासो वसिष्ठः कपिलो विश्वामित्रो महातपाः ।
नारदोऽथ भरद्वाजो वामदेवः शुकस्तथा ।
पराशरोऽथ भगवानगस्त्यो मुनिसत्तमः ।
मार्कण्डेयो ऋश्यशृङ्गः कुणिर्मुनिवरः कुशः ॥

शुनकोऽथ प्रशान्तात्मा याज्ञवल्क्योऽथ गौतमः ।
मुद्गरो रोमशश्चैव दुर्वासा मङ्कणस्तथा ॥

* * * *

सङ्गतास्तापसश्रेष्ठाः सूतं धर्मार्थकोविदम् ।
पप्रच्छुर्मुनिशार्दूलास्तपसां राशिमूर्जितम् ॥
पुरा कृतयुगे तात क्षेत्रमाहात्म्यमुक्तवान् ।
श्रुत्वा वयं परं हर्षं प्राप्ताः स्म भवतः कथाम् ॥
तदेव पुनरिच्छामः श्रोतुं माहात्म्यमुत्तमम् ।
माहात्म्यं श्रीपुरेः पुण्यं संक्षेपेण श्रुतं पुरा ॥
अधुना श्रोतुमिच्छामो विस्तरेण महामुने ।

* * * *

पुलस्त्यः—

हन्त ते कथयिष्यामि वामगव्याः पुरः कथाम् ।
दृढव्रतस्य विप्रस्य पश्चाद्वक्ष्यामि ते कथाम् ॥
आसीत् सरस्वतीतीरे कूणिर्नाम महातपाः ।
आसीत् तस्य म ıभागा कन्या शुश्रूषणे रता ॥
ब्रह्मलोकं गते तस्मिन् नियता ब्रह्मवादिनी ।
अकरोत् सा तपस्तीव्रं विरक्ता बहुलाः समाः ॥

* * * *

इतस्त्रियोजनेऽस्माकं सैषा वामगवी पुरी ।
इह विश्रम्य यास्यामो दिनमेकं यथासुखम् ॥
स्नात्वा कैरविणीतीर्थे नत्वा देवं जनार्दनम् ।
सर्वपापविनिर्मुक्ता यास्यामः श्वः पुरीं निजाम् ॥
इति तेऽन्योन्यमामन्त्र्य तथा चक्रुर्द्विजातयः ।

Colophon:

इति श्रीवामनपुराणे उत्तरभागे कौशिकपुलस्त्यसंवादे वामगवीमाहात्म्यं नामैकत्रिंशोऽध्यायः ।

End:

इदं पुलस्त्यकथितं गुह्याद्गुह्यमनुत्तमम् ।
कौशिकप्रमुखास्सर्वे श्रुत्वा विस्मयमागताः ॥

अपूजयन्मुनिवरं पुलस्त्यं तपसां निधिम् ।
वयं कृतार्था धन्याश्च मुने त्वदनुकम्पया ॥
संवादमावयोः शृण्वन् पठन् विश्रन् लिखन् नरः ।
ऐश्वर्यमायुरारोग्यं लभते नात्र संशयः ॥

Colophon:

इति श्रीवामनपुराणे कौशिकपुलस्त्यसंवादे श्रीवामगवीमाहात्म्ये ब्रह्मप्रोक्तवराहक्षेत्रतीर्थादिवैभवविशेषकथनं नाम चतुस्त्रिंशोऽध्यायः ॥

திருவிடவெந்தை மாஹாத்மியம் ஸம்பூர்ணம்.

No. **15720.** श्रीनिवासक्षेत्रमाहात्म्यम्.

ŚRĪNIVĀSAKṢĒTRAMĀHĀTMYAM.

Pages, 17. Lines, 20 in a page.

Begins on fol. 20*a* of the MS. described under last No.

Complete.

Deals with the greatness of the place Śrīnivāsakṣētra near Mahīsāra, pura (Tirumaḷisai); taken from the Brahmāṇḍapurāṇa.

Beginning:

श्रीनारदः—

श्रीमन्महीसारपुरीमाहात्म्यं कथितं तव ।
श्रीनिवासपुरस्याद्य माहात्म्यं कथयाम्यहम् ॥

श्रीभृगुः—

अहो महीसारपुरी महत्येषा महामुने ।
पुनः पुनर्वदसि मे यदद्य भगवत्कथाम् ॥
भगवंस्त्वन्मुखाम्भोजाच्च्युतं हरिकथामृतम् ।
पिबतो नास्ति मे तृप्तिस्तन्ममाचक्ष्व सर्वशः ॥
श्रीनिवासपुरं ह्येतत् भूतले कुत्र वर्तते ।
श्रीनिवासपुराख्यानं तस्यासीत् केन हेतुना ॥
कीदृशं चास्य माहात्म्यं किं तीर्थं तत्र विद्यते ।
किंनामा भगवांस्तत्र कथयैतदशेषतः ॥

श्रीनारदः—

यत्पृष्टोऽहं त्वया ब्रह्मन् श्रीनिवासपुरं प्रति ।
सर्वं तत् कथयाम्यद्य समाहितमनाः शृणु ॥

महीसारपुरस्यैषा पश्चिमोत्तरभागतः ।
श्रीनिवासपुरी भाति पार्श्वेन ह्यर्धयोजनात् ॥
माहात्म्यं वक्ष्यते तस्य संक्षेपेण मया तव ।
श्रीनिवासपुराख्याया हेतुं पूर्वं वदाम्यहम् ॥

End:

श्रीनिवासस्थले तस्मिन् वराहक्षेत्रसंज्ञके ।
तीरे वरुणतीर्थस्य क्षीराब्धिसदृशौजसः ॥
अन्नदानं प्रशंसन्ति दानानां दानमुत्तमम् ।
कन्यादानं क्षेत्रदानं विद्यादानं तथैव च ॥
वस्त्रदानं तीर्थदानं पात्रदानं तथैव च ।
गजदानं चाश्वदानं गोदानं रत्नमेव च ॥
उष्णीषदानं कवच्धनदानं महामुने ।
यः करोति स धर्मात्मा सर्वरोगैर्विमुच्यते ॥
दीर्घमायुरवाप्नोति ससुहृत्पुत्रबान्धवैः ।
प्राप्तवानुत्तमान् लोकान् विष्णुलोकांश्च गच्छति ॥
तदेतत्तीर्थमतुलं सर्वतीर्थाधिदैवतम् ।
एतद्वरुणतीर्थस्य प्रभावं कल्मषापहम् ॥
यः शृणोति सकृद्भक्त्या सर्वान् कामानवाप्नुयात् ।

Colophon:

इति श्रीब्रह्माण्डपुराणे क्षेत्रकाण्डे भृगुनारदसंवादे श्रीनिवासपुरमाहात्म्ये वरुणतीर्थप्रभावकथनं नामैकोनविंशोऽध्यायः ॥

No. **15721**. मल्लापुरक्षेत्रमाहात्म्यम्.

MALLĀPURAKṢĒTRAMĀHĀTMYAM.

Pages, 89. Lines, 20 in a page.

Begins on fol. 31*a* of the MS. described under No. 15719.

Complete.

Deals with greatness of Mallāpurakṣētra (now known as Mahābalipuram); taken from the Brahmāṇḍapurāṇa.

Beginning:

एकदा नारदो योगी प्राकृतो बालिशो यथा ।
संक्षुब्धहृदयोऽभीक्ष्णं नाभूच्चित्ते समाहितः ॥

अथ क्षुब्धाशयो योगी विचिन्वंस्तस्य कारणम् ।
न किञ्चित्प्राप मतिमान् बहुधापि विचारयन् ॥
अथ चेतस्समाधानं तपसेति विचिन्तयन् ।
मतिमांस्तस्य चरणे स्थाने वर्षमचिन्तयत् ॥

* * * *

ब्रह्मा—

वद सूत महाभाग पुण्यश्रवणकीर्तन ।
सौलभ्यं गुणमुख्यं मे विष्णोरमिततेजसः ॥
अनेकमुनयः पूर्वं नैमिशारण्यमाश्रिताः ।
विष्णोः सौलभ्यमुद्दिश्य विवदन्तः परस्परम् ॥
न निश्चिन्वन्ति ते सर्वे तच्छ्रुतं निकटे मया ।
तदादि संशयो ब्रह्मन् वर्तते मम चेतसि ॥

* * * *

Colophon:

इति श्रीब्रह्माण्डपुराणे क्षेत्रखण्डे अगस्त्यसूतसंवादे मल्लापुरीमाहात्म्ये त्रिनवतितमोऽध्यायः ॥

रुद्रः—

इह देवि महाभागे ब्राह्मणः सुदृढव्रतः ।
पुण्डरीक इति ख्यातो विष्णुकैङ्कर्यतत्परः ॥
सर्वदा पुण्डरीकैस्तु फुल्लैर्गन्धमनोहरैः ।
अर्चयत्ययमीशानं जगतां भक्तिसन्नतः ॥
तत्र तत्र भुवि प्राज्ञो विष्णुमाराध्य हृष्टधीः ।
कदाचित् पश्चिमाम्भोधेस्तीरे तत्र महाह्रदात् ॥
पद्मानि कनकाभानि बहूनि समुपाहरन् ।

End:

अथ मुनिरागतः सरसि तत्र निमज्जनतो
भजनपरैस्तवैश्च स्थलशायिपदाम्बुजयोः ।
विगतमनस्तमा विमलतां च सुगोचरतां
सुरमुनिराप तत्र निवसन् दिवसान् सुबहून् ॥

इदं गृह्यतमं पुण्यं सद्यः श्रेयोवहं नृणाम् ।
आख्यानमतुलं श्रोतृन् सद्यः पापाद्विमोचयेत् ॥
लिखति पठति योऽसौ संश्रुणोत्यादरेण
प्रतिवदति विवादात् भक्त आख्यानमेतत् ।
लिखितमपि च मूर्ध्ना पुस्तकं यो बिभर्ति
स्वभवनगमितं वा तस्य मुक्तिः करस्था ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे क्षेत्रखण्डे अगस्त्यसूतसंवादे श्रीमल्लापुरमाहात्म्ये शततमोऽध्यायः ।

महाबलिपुरापरनामकश्रीमल्लापुरमाहात्म्यं संपूर्णम् ॥

No. **15722**. गणकदर्पणम्.
GAṆKADARPAṆAM.

Substance, paper. Size, 12½ × 9 inches. Pages, 2. Lines, 24 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Mahābhārata 2*a*.
Contains Rāhudūṣaṇa only.
An astronomical work dealing mainly with eclipses.

Beginning:

अमृतस्वादनार्थाय विष्णुचक्रहतोऽसुरः ।
. . . . प्राप्तश्चन्द्रदिवाकरौ ॥
ग्रसन्तीति वदन्त्येके मतमेतन्न . . . ।
कुत्रस्थो वागतो राहुः कोऽसौ ग्रसति तौ तदा ॥
पादादिग्रसनानां तु रवीन्द्वोः किन्नु कारणम् ।
पादादिधूम्रवर्णाद्यास्त्विन्दोः कार्ष्ण्यं रवेः कथम् ॥
पाण्डुत्वं किं विधोः पश्चान्मोक्षो भानोर्विपर्ययः ।
खण्डग्रासे शशाङ्कस्य खण्डशृङ्गः कथं भवेत् ॥

End:

एवं स्वकीयसिद्धान्ते बभाण कमलासनः ।
तस्मात् तन्मतमालोच्य मयापि प्रतिपादितम् ॥

शशाङ्कांशगतो राहुश्छादयत्यर्कमण्डलम् ।
भूच्छायां पुरतो राहुश्चावृतोरिन्दुमण्डलम् ॥

Colophon :

इति गणकदर्पणे राहुदूषणम् ।

No. 15723. महाभारतम्.
MAHĀBHĀRATAM.

Pages, 16. Lines, 24 in a page.

Begins on fol. *2a* of the MS. described under the last No.

Contains the Adhyāyas 1 to 12 complete in the Bhīṣmaparvan

Same work as that described under No. 1940 ante.

No. 15724. भद्रकाल्युत्पत्तिः.
BHADRKĀLYUTPATTIḤ.

Substance, paper. Size, 13 × 5½ inches. Pages, 78. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete in 9 Adhyāyas as found in the Mārkaṇḍēyapurāṇam.

Same work as that described under R. No. 2951 of the Triennial Catalogue Vol. IV, Part I–A.

No. 15725. मीमांसान्यायकोशः.
MĪMĀMSĀNYĀYAKŌŚAḤ.

Substance, paper. Size, 13 × 8½ inches. Pages, 338. Lines, 25 on a page. Character, Grantha. Condition, good. Appearance, old

A work explaining certain select subjects in the Pūrvamīmāṁsā according to Prabhākara's view.

Contains the following subjects :—

१. जिज्ञासासूत्रार्थः.
२. चोदनासूत्रार्थविचारः.
३. निमित्तसूत्रविचारः.
४. सत्संप्रयोगसूत्रार्थविचारप्रमाणसामान्यलक्षणकथनम्.
५. प्रत्यक्षादिलक्षणविचारः.
६. औत्पत्तिकसूत्रविचारान्यथाख्यातिनिरासौ.
७. निरालम्बनवादः.
८. शून्यवादः.

Beginning:

प्रवरगुणैकास्पदाय स्थिररत्नसकुलबीजकुम्भभूताय ।
भुवनकोशस्य गोप्त्रे ब्रह्मणे . . . . ॥
नित्योदारगुणैश्वर्यरूपभोगादिसम्पदे ।
विविधाङ्गाय वेदान्तवेद्याय ब्रह्मणे नमः ॥

नमो जैमिनये वेदसंपुटनिगूढविष्फारयित्रे न्यायप्रज्वलितचेतसे नमोऽस्त्वाचार्येभ्यः ।

नानान्यायमहारत्ननिर्भाष्यमहोदधिः ।
क्लृप्तो येन नमस्तस्मै शबरस्वामिवेधसे ॥
सृष्टाविद्यानिशाध्वंसिनिबन्धमयवासरम् ।
उज्ज्वासितजगज्जाड्यं नमस्यामः प्रभाकरम् ॥
नमः शालिकनाथाय पुंसे टीकानयार्णवे ।
पञ्चिकामृतनौर्येन कृता तस्मै महीयसे ॥
ध्वस्तान्यदृष्टिसंसिद्धप्रक्रियापञ्चिकाद्वयम् ।
भवनाथगुरुं वन्दे न्यायोपादानविग्रहम् ॥
गुरुक्रमागतज्ञानप्रवाहैकप्रयोजनः ।
नाथद्वयमतोद्धारो न्यायकोशो निबध्यते ॥

अथातो धर्मजिज्ञासा ॥

मीमांसाशास्त्रारम्भसमर्थनमिदमधिकरणम् । मीमांसाशब्देन च वेदेतिकर्तव्यतात्मतया पूजितस्तर्क उच्यते । तथाहि मान पूजायामित्यस्माद्धातोः मानेर्जिज्ञासायामित्युपसंख्यानोपगृहीतेन मानबधदान्शान्भ्यो दीर्घश्चाभ्यासस्येत्यनेन सूत्रेण सनि कृते मीमांसेति रूपं सम्पद्यते । ततश्च पूजिता जिज्ञासा मीमांसाशब्दस्यार्थः । जिज्ञासापदं च गुरुमतामृतकारेण व्याख्या-

तम् । ज्ञानप्रयोजनाचेच्छा विचारोपक्रमात्मिका विचारपूर्वरूपत्वात् जिज्ञासेत्यभिधीयत इति । अयमर्थः। संशयिते विषये तत्वज्ञानप्रयोजना तावदिच्छा जायते, तदनन्तरं विचारः ।

End:

एकस्मिन्नेव शरीरे जीवः निर्जीवानीतराणीति सर्वलोकविरुद्धकल्पना, न च जीववतः शरीरविशेषस्य निर्णयः शक्यः । इतः पुनः कश्चिन्मुक्त इति सर्वशास्त्रविरोध इत्यादयो बहवो दोषाः । कथं च प्रत्यक्षसिद्धस्य भेदस्य भ्रान्तित्वम् । यत्तु प्रत्यक्षमपि विधिमात्रोपक्षीणव्यापारमपरिस्पृष्टान्योन्यभेदन्तदेकमेव तत्वं साक्षात्करोतीति; सत्यं विधायकमेव प्रत्यक्षं तत्तु विदधाति विरूपं रूपन्तथा रसं . ।

No. 15726. वासिष्ठरामायणम्—सव्याख्यानम्.

VĀSIṢṬARĀMĀYAṆAM WITH COMMENTARY.

Substance, paper. Si e, 13 × 8½ inches. Pages, 842. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, old.

Bound in 2 Volumes

Same work as that described under R. No. 4663 of the Triennial Catalogue, Vol. I, Part I—A, wherein see for the beginning.

The commentary is by Mummaḍidēva.

End:

प्रियवस्तुवियोगेन ज्ञातभेदस्य योगिनः ।
शास्त्रं विना किमन्यत् स्यादन्तः सन्तापशान्तिदम् ॥
चिदम्बरात् प्रोदित एष पूर्णः शास्त्रेन्दुरानन्दनिधिस्सुपादः ।
सान्द्रामृतः काप्यकृतोपशोभः स्फुरत्प्रकाशः क्षपितान्धकारः ॥
स्नातं तेन समस्ततीर्थसलिलैः सर्वापि दत्तावनिः
ज्ञानानां च समस्तमिष्टमनघं देवाश्च संपूजिताः ।
संसाराच्च समुद्धृताः स्वपितरस्त्रैलोक्यपूज्योऽप्यसौ
यस्य ब्रह्मविचारिणः क्षणमिह स्थैर्यं मनः प्राप्नुयात् ॥

Colophon:

इति काश्मीरपण्डितानन्दसमुद्धृते वाल्मीकीये मोक्षोपाये शतसहस्रिकायां संहितायां फलश्रुतिर्नाम चतुश्चत्वारिंशः सर्गः ।

इति वासिष्ठषट्सहस्रिका समाप्ता ।

इति वाल्मीकिप्रोक्तायां शतसहस्रिकायां ज्ञानखण्डे वसिष्ठरामसंवादे मोक्षोपाये काश्मीरपण्डितेनोद्धृतः सारसमुच्चयः समाप्तः ॥

No. 15727. यन्त्रसारः.

YANTRASĀRAH.

Substance, paper. Size, 13 × 8½ inches. Pages, 350. Lines, 25 on a page Character, Grantha. Condition, good. Appearance, old.

Gives details in connection with the drawing of certain Yantras or mystic diagrams.

Beginning :

अथ प्रवक्ष्यामि च वैदिकानि यन्त्राणि संक्षिप्य स तान्त्रिकाणि ।
इष्टाय भक्ताय सुसंयताय शुश्रूषवे शिष्यवराय तावत् ॥
अथ कविरुक्त्वा यन्त्राण्यर्थान्यपि तत्र तत्र संक्षेपात् ।
स्वयमेव वदन्ति भूयो दुर्ज्ञेयत्वाद्विधाय मन्त्रविदाम् ॥

आनुष्टुभो मन्त्रो लिख्यते—

आलिख्याष्टदलं पद्मं तारं तत्कर्णिकान्तरे ।
तस्योदरे समिति च जीवं साध्यार्णवेष्टितम् ॥
तारस्य पार्श्वयोर्द्दृष्टिरि ई इति वै पुनः ।
तयोरधस्ताच्छ्रोत्रे च उ ऊ इति च तत्पुरः ॥
जिह्वां स्नुमिति दिक्ष्वैतान् सोऽहं हं साक्षरान् क्रमात् ।
प्राणप्रतिष्ठामन्त्रं च गायत्रीयन्त्रमन्त्रयोः ॥
यथावकाशं विलिखेद्वृत्ताकारेण तद्बहिः ।
द्वौ द्वौ स्वरौ केसरेषु दलेषु त्र्यम्बकाक्षरान् ॥

End :

षष्ठ्यां स्नानं प्रकुर्वीत सप्तम्यां वस्त्रमेव च ।
यज्ञोपवीतमष्टम्यां नवम्यां गन्धमेव च ॥
दशम्यां पुष्पदानं स्यादेकादश्यां च धूपकम् ।
द्वादश्यां दीपदानं स्यात् त्रयोदश्यां हविस्तथा ॥
चतुर्दश्याञ्जलिं कुर्यात् पञ्चदश्यां प्रदक्षिणम् ।
षोडश्योद्वासनं कुर्यादेवमाराधयेद्धरिम् ॥

No. 15728. आपस्तम्बशुल्बसूत्रम्, भाष्यत्रयोपेतम्.
ĀPASTAMBAŚULBASŪTRAM WITH THREE COMMENTARIES.

Substance, paper. Size, 13 × 8½ inches. Pages, 512. Lines, 24 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Same text as that described under R. No. 5057 and same commentaries as those described under R. Nos. 911(*a*), 931(*c*) and 3924(*d*) of the Triennial Catalogue, by Sundararāja, Karavindasvāmin and Kapardisvmin.

Complete in 6 Paṭalas.

No. 15729. तत्त्वशुद्धिः.
TATTVAŚUDDHIḤ.

Substance, paper. Size, 13 × 8½ inches. Pages, 341. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Tattvaśuddhivyākhyā 171*a*.

Complete in 46 Prakaraṇās.

Same work as that described under R. No. 2897 of the Triennial Catalogue, Vol. IV, Part I—A. By Jñānaghana disciple of Bōdhaghana.

Contains the following Prakaraṇas after the 33rd Prakaraṇa :—

३४. सर्वगतत्त्वनिरूपणप्रकरणम्.
३५. साक्षिस्वरूपनिरूपणप्रकरणम्.
३६. एकात्मनिरूपणप्रकरणम्.
३७. सुखस्वभावनिरूपणप्रकरणम्.
३८. जीवब्रह्मैकत्वनिरूपणप्रकरणम्.
३९. ब्रह्मज्ञाननिरूपणप्रकरणम्.
४०. समुच्चयनिराकरणप्रकरणम्.
४१. आत्मज्ञानाधिकारनिरूपणप्रकरणम्.
४२. ज्ञानविधिनिराकरणप्रकरणम्.
४३. श्रवणादिसाधननिरूपणप्रकरणम्.
४४. अज्ञाननिवृत्तिनिरूपणप्रकरणम्.
४५. जीवन्मुक्तिसमर्थनप्रकरणम्.
४६. मोक्षनिरूपणप्रकरणम्.

Beginning :

यदेतन्निर्धूतद्वयमखिलविज्ञानममृतं
समस्तव्यस्तात्मस्थिरचरविकल्पैकनिलयम् ।
निरीहं निर्लेपं निरवधिसुखं ब्रह्म परमं
नमस्तस्मै नित्यं भवभयविनाशाय हरये ॥

End:

मोक्षस्यापुरुषार्थत्वमनुमानेनापि न शङ्कनीयम् । तस्मात् तत्त्वमस्यादिवाक्यजनितापरोक्षब्रह्मविद्ययानाद्यविद्यापटलसमुत्पाटनेन नित्यसिद्धनिरतिशयानन्दप्रत्यगद्वितीयपरमात्मचैतन्यात्मनावस्थानमपवर्ग इति भगवतो भाष्यकारस्य मतमाश्रयणीयं निःश्रेयसार्थिभिरिति ।

श्रीमच्छङ्करभाष्यदुग्धजलधेरादाय विद्याजलं
सद्यो बोधघनेऽपि देयफलवत् सस्योत्करे वर्षति ।
तद्विद्याजलबिन्दुसंप्लुतमतिश्चक्रे सदाधोक्षजे
भक्तो ज्ञानघनाभिधानगदितस्तत्त्वार्थशुद्धिं मुनिः ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्बोधघनभगवत्पूज्यपादशिष्यस्य भगवज्ज्ञानघनाचार्यस्य कृतौ तत्त्वशुद्धौ मोक्षनिरूपणप्रकरणमष्ट(णं षट्) चत्वारिंशं समाप्तम् ।

No. **15730.** तत्त्वशुद्धिव्याख्या.
TATTVAŚUDDHIVYĀKHYĀ.

Pages, 76. Lines, 20 in a page.

Begins on fol. 171*a* of the MS. described under the previous No.
Complete.
A commentary on the Tattvaśuddhi described above.
By Uttamajñayati disciple of Jñānōttama.

Beginning:

यदध्यासात् जगच्चित्रमस्ति भाति प्रियं भवेत् ।
तस्मै तस्य चिदानन्दपूर्णब्रह्मात्मने नमः ॥
तस्मै ज्ञानोत्तमार्याय जगन्मोहभिदे नमः ।
उत्तमज्ञो यतिवरो ज्ञानोत्तमपदाश्रयः ॥
तत्वशुद्धेस्तु स व्याख्यामहं कुर्वे यथाबलम् ।

भूतचतुष्टयत्ववादिनं व्यावर्तयति—एकमिति । भूतानां संहतिस्तत्वमिति लोकायतभेदस्तं व्यावर्तयति—निर्धूतद्वयमिति । शून्यवादिनं व्यावर्तयति—विज्ञानमिति । क्षणिकविज्ञानात्मवादिनं व्यावर्तयति—अखिलेति । व्यापीत्यर्थः । सर्वज्ञान् व्यावर्तयति—अमृतामिति । साङ्ख्यात्मानं व्यावर्तयति—समस्त-

व्यस्तेति । निलयाश्रयमित्यर्थः । परिणामब्रह्मत्वादिनं व्यावर्तयति—निरवधि सुखमिति । कथमेवं रूपयति . . . . ब्रह्मत्वादित्याह । ब्रह्मेति ।

End:

आपरोक्ष्यं त्विति । अपरोक्ष्यं सुखादभिन्नं भवतु । सुखरूपापरोक्ष्येति त्वात्मनो भिद्यतामिति नेत्याह—आत्मन एवेति । अहो न तस्यातिशयान्तरापेक्षे सति सुखचैतन्ययोरात्मनोऽन्यत्वेनात्मसम्बन्धाभावात् सम्बन्धनिमित्तमिति यथान्तरमात्मनो नापेक्षणीयमित्यर्थः । तच्चेति सुखापरोक्ष्यमित्यर्थः । सुखस्य तदभेदाभावोपगमादिति । आत्मना, तन्मात्रचैतन्येन चाभेदाभ्युपगमादित्यर्थः । सस्योत्करे सस्यपुञ्ज इत्यर्थः ।

Colophon:

इति परानन्दपरिज्ञानपरितृप्तपरमहंसपरिव्राजकाचार्यश्रीमज्ज्ञानोत्तमभगवत्पूज्यपादशिष्येणोत्तमज्ञयतिवरेण मयेयं व्याकृतेति ।

No. **15731.** पुराणसारः.

PURĀṆASĀRAḤ.

Substance, paper. Size, 13 × 8½ inches. Pages, 520. Lines, 25 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete.

A treatise dealing with a variety of subjects beginning with the creation of the universe. It is purported to have been based on various Purāṇās. The specific topics dealt with in the work are apparent from the headings of the Adhyāyas given below :—

१. अष्टादशपुराणोपवर्णनम्.
२. अद्वैतप्रतिपादनम्.
३. सृष्टिनिरूपणम्.
४. प्रणवोत्पत्तिः.
५. जातिनिर्णयः.
६. कृतादियुगधर्मः.
७. कलिप्रशंसाशूद्रधर्मनिरूपणम्
८. वैश्यधर्मकथनम्.
९. सोमसूर्यवंशराजप्रशंसा.
१०. राजधर्मयुधिष्ठिरधर्मसंवादः.
११. रामोपाख्यानम्.
१२. ब्राह्मणावमानदोषनिरूपणम्.
१३. शरणागतरक्षाप्रतिपादनम्.
१४. ब्राह्मणसंमानफलम्.
१५. ब्राह्मणधर्मः.
१६. उपनीतानुपनीतधर्मकथनम्.

१७. ब्रह्मयागकथनम्.
१८. बहुभार्यधर्मोपवर्णनम्.
१९. सन्तत्युत्पादनप्रतिपादनम्.
२०. निष्ठानुष्ठानम्.
२१. सन्ध्यायज्ञनिरूपणम्.
२२. दैवतार्चनम्.
२३. पञ्चमहायज्ञनिरूपणम्.
२४. अतिथिपूजाप्रशंसा.
२५. भोजनशयनविधिः.
२६. श्राद्धनिरूपणम्.
२७. Do.
२८. वनस्थयतिधर्मः.
२९. प्रायश्चित्तविधिः.
३०. म्लेच्छधर्मापद्धर्मकथनम्.
३१. सत्यप्रशंसा.
३२. अधिकारिभेदेन पूज्यदेवताप्रतिपादनम्.
३३. पितृभक्तिप्रशंसा.
३४. मातृभक्तिप्रशंसा.
३५. मातृवाक्यपरिपालने पञ्चेन्द्रोपाख्यानम्.
३६. पितृवाक्यप्रशंसायां जामदग्न्योपाख्यानम्.
३७. भीष्मचरितम्.
३८. भीष्मभार्गवयुद्धम्.
३९. आचार्यभक्तिनिरूपणम्.
४०. गुरुशुश्रूषामाहात्म्यदीक्षाकथनम्.
४१. शिवभक्तिनिरूपणम्.
४२. विष्णुभक्तिकथनम्.
४३. शक्तिभक्तिकथनम्.
४४. भानुभक्तिनिरूपणम्.
४५. गणाधिपतिभक्तिः.
४६. स्कन्दभक्तिकथनम्.
४७. शास्त्रप्रमाणकथनम्.
४८. शीलप्रशंसा.
४९. शीलवतीचरितम्.
५०. पतिव्रतामाहात्म्यकथनम्.
५१. अनसूयावरप्रदानम्.
५२. सतीवर्तनकथनम्.
५३. सावित्रीब्रह्मचारिसंवादः.
५४. भर्तृवञ्चदोषानिरूपणम्.
५५. अग्निप्रवेशकथनम्.
५६. भुवनकोशः.
५७. आयुर्हानिवृद्धिकारणनिरूपणम्.
५८. पातालकथनम्.
५९. ज्योतिश्चक्रकथनम्.
६०. पिण्डोत्पत्तिः.
६१. विष्णुमायाप्रकथनम्.
६२. जीवदुःखनिरूपणम्.
६३. नरकमार्गनिरूपणम्.
६४. मृताप्यायनोपायकथनम्.
६५. नरकदुःखकथनम्.
६६. सौम्यमार्गसुखानुभावकथनम्.
६७. स्वर्गनिन्दाकथनम्.
६८. यशोनाशात् सहसा पतनम्.
६९. वासनाधीनजन्मनिरूपणम्.
७०. कर्मनिन्दा.

Beginning :

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥
यं ब्रह्म वेदान्तविदो वदन्ति परं प्रधानं पुरुषं तथान्ये ।
विश्वोद्गतेः कारणमीश्वरं वा तस्मै नमो विघ्नविनायकाय ॥
दोर्भिर्युक्ता चतुर्भिः स्फटिकमणिमयीमक्षमालां दधाना
हस्तेनैकेन पद्मं सितमपि च शुकं पुस्तकं चापरेण ।
या सा कुन्देन्दुशङ्खस्फटिकपुटनिभा भासमाना समाना
सा मे वाग्देवतेयं निवसतु वदने सर्वदा सुप्रसन्ना ॥
नमः शिवाय साम्बाय ससुरायादिहेतवे ।
पञ्चावरणरूपेण प्रपञ्चेनावृताय ते ॥
व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् ।
पराशरात्मजं वन्दे शुकतातं तपोनिधिम् ॥
शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥
वर्तमाने समृद्ध्यर्थे सत्रे द्वादशवार्षिके ।
समासीनानभ्यगच्छत् ब्रह्मर्षीन् संशितव्रतान् ॥
विनयावनतो भूत्वा कदाचिद्रोमहर्षणः ।
तमाश्रममनुप्राप्तं जटावल्कलसंयुतम् ॥
भस्मोद्धूलितसर्वाङ्गं त्रिपुण्ड्राङ्कितमस्तकम् ।
रुद्राक्षमालाभरणं जटामण्डलमण्डितम् ॥

* * * *

चित्राः श्रोतुं कथास्तत्र परिवव्रुः समन्विताः ।
अभिवाद्य मुनींस्तांस्तु सर्वानेव कृताञ्जलिः ॥
अपृच्छत् स तपोवृद्धिमृषिभिश्चाभिनन्दितः ।
अथ तेषूपविष्टेषु सर्वेष्वेव तपस्विषु ॥
निर्दिष्टमासनं भेजे विनयाद्रोमहर्षणः ।
सुखासीनं ततस्तं तु विश्रान्तमुपलक्ष्य च ॥
पुराणसंहितां पुण्यां पप्रच्छुः पुण्यगौरवाः ।

ऋषय ऊचुः—

भवता भगवन् व्यासः सर्वज्ञः करुणानिधिः ।
इतिहासपुराणार्थं पुरा सम्यगुपासितः ॥
तस्य ते सर्वरोमाणि वचसा हर्षितानि च ।
द्वैपायनस्य तु भवांस्ततो वै रोमहर्षणः ॥
भवन्तमेव भगवान् व्याजहार स्वयं प्रभुः ।
मुनीनां संहितां वक्तुं व्यासः पौराणिकः पुरा ॥
त्वं हि स्वायम्भुवे यज्ञे सुत्याहे वितते सति ।
संभूतः संहितां वक्तुं स्वांशेन पुरुषोत्तमः ॥
तस्माद्भवन्तं पृच्छामः पुण्यां पौराणिकीं कथाम् ।
वक्तुमर्हति चास्माकं पुराणार्थविशारद ॥
मुनीनां वचनं श्रुत्वा सूतः पौराणिकोत्तमः ।
वक्तुमारभते देवं नमस्कृत्य पिनाकिनम् ॥
ओं नमोऽहंपदार्थाय पराहन्तास्वरूपिणे ।
नमो हिरण्यगर्भाय हरये शङ्कराय च ॥
सरस्वत्यै नमो नित्यं विघ्नेशाय नमो नमः ॥
पाराशर्यं परमपुरुषं विश्वदेवैकयोनिं
विद्याधारं विमलमतिदं वेदवेदान्तवेद्यम् ।
शश्वच्छान्तं शमनविषयं शुद्धबुद्धिं विशालं
वेदव्यासं विमलयशसं सर्वदाऽहं नतोऽस्मि ॥
एवं देवान् नमस्कृत्य सूतः पौराणिकोत्तमः ।
अष्टादश पुराणानि तथान्यानि च सोऽब्रवीत् ॥

End :

पुनश्च सूतः सर्वज्ञस्तान् मुनीनवलोक्य च ।
प्राह गम्भीरया वाचा भवतां शिवमस्त्विति ॥
वेदपद्मनिकरस्य भास्करं देवदेवसदृशं वृणानिधिम् ।
व्यासमोहविषवेगभेषजं . . . . ॥
ये वेदवेदान्तविदो महाजनाः शिवाभिमानाय निरस्तकिल्बिषाः ।
नमामि वाचा शिरसा धिया च तान् भवाहिवेगस्य निवारकारणान् ॥
परस्परस्योपकृतं भवद्भिर्मया च पौराणिकमार्गयोगात् ।
अतो गमिष्येऽहमवाप्तकामः समस्तमेवास्तु शिवं सदा वः ॥
सूते कृताशिषि गते मुनयः सुव्रत्याः
यादेवानेव पर्यवसिते महति प्रयोगे ।
काले कलौ च विषये कलुषायमाणे
वाराणसीपरिसरे वसतिं वितेनुः ॥

Colophon :

इति श्रीमत्पुराणसारे पुराणसारावतरणकथनं नाम चतुरशीतितमोऽध्यायः ।

श्रीमत्पुराणसारः समाप्तः ॥

No. **15732.** चाणक्यसूत्रम्.
CĀṆAKYASŪTRAM.

Pages, 26. Lines, on a page.

Begins on. fol. 17*a* of the MS. described under No. 15448.

Same work as that described under R. No. 1848(*a*) of the Triennial Catalogue, Vol. II, Part I—C.

Complete.

No. **15733.** शिशुपालवधः, आन्ध्रटीकासहितः.
ŚIŚUPĀLAVADHAḤ WITH TELUGU MEANING.

Substance, paper. Size, 12 × 7½ inches. Pages, 616. Lines, 20 in a page. Character, Telugu. Condition, good. Appearance, old.

Contains the Sargas 1 to 6 and 48 stanzas in the 7th Sarga; but wants the end in the 1st Sarga and the beginning in the 2nd Sarga.

No. 15734. तत्त्वचिन्तामणिदीधितिव्याख्या—जागदीशी.
TATTVACINTĀMAṆIDĪDHITIVYĀKHYĀ : JĀGADĪŚĪ.

Substance, paper. Size, 15½ × 3½ inches. Pages, 202. Lines, 7 in a page. Character, Bengali. Condition, good. Appearance, new.

Complete.

Same work as that described under No. 4086 ante.

By Jagadīśa.

No. 15735. सारार्थसंग्रहः.
SĀRĀRTHASAṄGRAHAḤ.

Substance, paper. Size, 8½ × 6¾ inches. Pages, 10. Lines, 19 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 3*a*. The other work herein is Saṅgītaviṣaya (Telugu) 1*a*.

Wants the beginning ; otherwise complete.

A brief treatise on Viśiṣṭādvaita-vēdānta. By Śrīvatsaṅka Śrīnivāsa.

Beginning :

. . व्यपगमाच्छक्तेः कार्यस्यात्रापि दर्शनात् ।
विशेषणं विशिष्टस्य लक्ष्याण्यस्योपलक्षणम् ॥
कार्यकल्प्यं न कर्त्रैक्यं लाघवात् स्यादकर्तृकम् ।
अप्रवृत्तिकरस्यापि साफल्यं निधिवाक्यवत् ॥
न प्रधानपरो वाक्यगणो जीवपरोऽपि च ।
इति पञ्चमषष्ठाभ्यामुक्तः शेषैः प्रपञ्च्यते ॥
आदित्यमण्डले दृश्यः श्रीकान्त्या कनकप्रभः ।
दलत्सु नालनीरस्थरक्तपद्मेक्षणः प्रभुः ॥
ब्रह्मैव लोककामेशो मण्डलेऽक्षिणि दक्षिणे ।
लोकस्य गतिराकाशो न भूतमनुवादतः ॥

* * * *

Colophon:

श्रीवत्सवंशतिलकश्रीनिवासेन निर्मिते ।
सारार्थसंग्रहेऽध्याय इति पूर्णः समन्वयः ॥

End :

आविर्भवत्स्वस्वरूपो ब्रह्माहमिति पश्यति ।
स्वप्रकाशो ह्युक्तगुणो पित्रादीन् सृजतीच्छया ॥
सशरीरोऽशरीरश्च जगद्व्यापारवर्जितः ।
मुक्तः षट्कोदितः केचित् सूत्रमन्त्यं विदुः पृथक् ॥
शब्दात् सङ्कल्पतः कर्मनाशान्नावृत्तिरित्यपि ।
किन्तु सङ्ख्यातिरेकः स्यादिति सर्वं समञ्जसम् ॥
गुरुप्रसादसंप्राप्तभाष्यसारेण निर्मिते ।
सारार्थसंग्रहेऽध्यायः पूर्णः पूर्णफलोज्ज्वलः ॥

Colophon :

इति श्रीवत्सकुलतिलकस्य श्रीवत्साङ्कश्रीनिवासस्य कृतिषु सारार्थ-संग्रहः संपूर्णः ॥

तडकमलकृष्णरायप्रभुवरगोष्ठीगरिष्ठविभवस्य ।
सारार्थसंग्रहोऽयं ग्रन्थस्त्र्यन्तसंमितो जयतु ॥

The scribe adds—

प्रजोत्पत्तिसंवत्सरसिंहपञ्चदशीदिवसभौमवारलिखितोऽयं ग्रन्थः सतां संतोषमादधातु ।

No. 15736. भागवतम्.

BHĀGAVATAM.

Substance, paper. Size, $9\frac{3}{4} \times 8\frac{5}{8}$ inches. Pages, 34. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Narakavarṇana taken from Vivēkacūḍāmaṇi (Kanarese) 18*a*.

Contains the 25th Adhyāya of the 5th Skandha.

Complete.

No. 15737. उदकशान्तिमन्त्रः.

UDAKAŚĀNTIMANTRAḤ.

Substance, paper. Size, $9\frac{5}{8} \times 4\frac{1}{8}$ inches. Pages, 28. Lines, 14 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Same work as that described under No. 3573 ante.

Complete.

No. 15738. तत्त्वसंग्रहरामायणम्.

TATTVASAṄGRAHARĀMĀYAṆAM.

Substance, paper. Size, 12 × 7½ inches. Pages, 1012. Lines, 22 on a page. Character, Telugu. Condition, good. Appearance, old.

Bound in 2 volumes.

Complete.

Same work as that described under R. Nos. 719 and 4532 of the Triennial Catalogue, wherein see for the beginning.

By Rāmabrahmānandasarasvatī.

End:

सूतः—

एवमुक्त्वा स्वभर्तारं गौरी भागवतोत्तमा ।
इदमेव सदाख्यानं पठन्ती शृण्वती मुदा ॥
राम रामेति जपति जपन्ती च मुदान्वहम् ।
उवास सा सुखेनैव कैलासे पतिना सह ॥
एतद्वः सर्वमाख्यातं गुह्याद्गुह्यतरं शुभम् ।
साक्षाद्रुद्रेण कथितं शुद्धसत्त्वतरं परम् ॥

ऋषयः—

सूत नानाशास्त्रनिष्ठं दुर्विभाव्यं पृथग्जनैः ।
रामतत्त्वं समाहृत्य प्रोक्तमेतदसंशयम् ॥
यस्माद्वयं सूतपुत्र कृतार्था वीतसंशयाः ।
. . . . ॥
. . संशयस्तस्य रा . . . जायते क्वचित् ।
श्रवणान्मननादस्य . . . नुस्मृतेर्नराः ॥
भुक्त्वैव वाञ्छितानर्थान् मोदन्ते विष्णुमन्दिरे ।

Colophon:

इति श्रीनानापुराणागमादिनिष्ठरामतत्त्वसंग्रहभूते श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्स्वयंप्रकाशानन्दसरस्वतीस्वामिपूज्यपादशिष्यश्रीमद्रामब्रह्मानन्दसरस्वतीस्वामिविरचिते तत्त्वसंग्रहरामायणे उत्तरकाण्डे श्रीरामायण . . . . वर्णनं नाम द्वाविंशस्सर्गः ॥

No. **15739.** ऋषिपञ्चमीव्रतोद्यापनम्.
ṚṢIPAÑCAMĪVRATŌDYĀPANAM.

Substance, paper. Size, 12 × 7⅜ inches. Pages, 3. Lines, 24 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Āmuktābharaṇa-saptamīvratōdyāpanavidhi 3*a*. Nāmadvādaśapañjara 3*b*. Arundhatī-vratakalpa 4*b*. Kēdārēśvaravratakalpa 6*a*. Śivarātrivratakalpa 13*b*. Śanitrayōdaśīvratakalpa 18*a*. Āmuktābharaṇasaptamīvratakalpa 19*b*. Āmuktābharaṇasaptamīvratakathā 23*b*. Āmuktābharaṇasaptamīvratō-dyāpanavidhi 26*a*. Ārdrāṣṭamīvratakalpa 28*a*. Aṣṭamīcaturdaśīvrata-kalpa 29*b*. Śivakṛṣṇāṣṭamīvratakalpa 31*a*. Umāmahēśvaravratakalpa 32*a*. Viṣṇuśivapratiṣṭhākalpa 34*a*. Mahāvartivratakalpa 36*a* Mahā-dīpavratakalpa 37*b*. Mahātiladīpavratakalpa 39*b*. Mahādīpavrata-kalpa 43*b*. Ardhōdayakalpa 44*b*. Sōmavāravratakalpa 47*a* Sōma-vāravratōdyāpanakalpa 49*b*. Vaitaraṇīgōdānavidhi 50*b*. Umāmahē-śvaravratakalpa 52*a*. Naṣṭadōraprāyaścitta 59*a*. Anantavratōdyāpana-kalpa 59*b*. Varalakṣmīvratakalpa 77*a*. Yamunāpūjā 78*a*. Ananta-vratakalpa 80*b*. Anantavratōdyāpanakalpa 84*a*. Umāmahēśvaravrata-kalpa 89*a* and 92*a*. Lakṣmīnārāyaṇavratakalpa 93*a* and 103*b*. Bṛha-tyumāvratakalpa 113*a*. Tulasīvratakalpa 113. Mathanadvādaśīvrata 115*a*. Dhātrīkalpa 115*b*. Rathasaptamīvrata 116*b*. Haritālikāvrata-kalpa 118*b*. Santānagōpālavrata 124*d*. Yōgajatantra 128*a*.

Incomplete.

Similar to the work described under No. 8248 ante.

Beginning:

देवदेव महादेव व्रतस्यास्य महीयसः ।
उद्यापनविधिं ब्रूहि मम ग्राह्यं पितामह ॥
कर्तव्यश्च कथं भक्तैरखण्डफलभोक्तृभिः ।

पितामह उवाच—

शृणु राजन् प्रवक्ष्यामि व्रतोद्यापनमुत्तमम् ।
कृतेन तेन यद्राजन् फलं हि विपुलं भवेत् ॥
तस्माद्यथापि कर्तव्यं वित्तशाठ्यविवर्जितम् ।
पञ्चमे वापि कर्तव्यमेकस्मिन् वत्सरेऽपि वा ॥
मध्यमे वापि कर्तव्यं मासि भाद्रपदे सति ।
चतुर्थ्यां पञ्चगव्येन विधिवत् कायशोधनम् ॥

End:

श्रावणे मासि पौर्णम्यां शुक्लपक्षे नराधिप ।
द्वारस्योभयतो लेख्या गोमयेन विचक्षणः ॥
पूजयेद्विधिवद् द्वारदाडिम .

No. **15740.** आमुक्ताभरणसप्तमीव्रतोद्यापनविधिः.
ĀMUKTĀBHARAṆASAPTAMĪVRATŌDYĀPANAVIDHIḤ.

Pages, 2. Lines, 24 on a page.

Begins on fol. 3*a* of the MS. described under the last No.
Complete.
Same work as that described under No. 8205 ante; but with Saṅkalpa.

No. **15741** नामद्वादशपञ्जरम्.
NĀMADVĀDAŚAPAÑJARAM.

Pages, 3. Lines, 24 on a page.

Begins on fol. 3*b* of the MS. described under No. 15739.
Incomplete.
Same work as that described under No. 6473 ante

No. **15742** अरुन्धतीव्रतकल्पः.
ARUNDHATĪVRATAKALPAḤ.

Pages, 4. Lines, 24 on a page.

Begins on fol. 4*b* of the MS. described under No. 15739.
Complete.
Same work as that described under No. 8206 ante.

No. **15743.** केदारेश्वरव्रतकल्पः.
KĒDĀRĒŚVARAVRATAKALPAḤ.

Pages, 16. Lines, 24 on a page.

Begins on fol. 6*a* of the MS. described under No. 15739.
Complete.
Same work as that described under No. 8280 ante.

No. 15744. शिवरात्रिव्रतकल्पः.
ŚIVARĀTRIVRATAKALPAḤ.

Pages, 10. Lines, 24 on a page.

Begins on fol. 13*b* of the MS. described under No. 15739.
Same work as that described under No. 8540.
Complete.

No. 15745. शनित्रयोदशीव्रतकल्पः.
ŚANITRAYŌDAŚĪVRATAKALPAḤ.

Pages, 4. Lines, 24 on a page.

Begins on fol. 18*a* of the MS. described under No. 15739.
Complete.
Same work as that described under No. 8529 ante.

No. 15746. आमुक्ताभरणसप्तमीव्रतकल्पः.
ĀMUKTĀBHARAṆASAPTAMĪVRATAKALPAḤ.

Pages, 9. Lines, 24 on a page.

Begins on fol. 19*b* of the MS. described under No. 15739.
Complete.
Same work as that described under No. 8203 ante.

No. 15747. आमुक्ताभरणसप्तमीव्रतकथा.
ĀMUKTĀBHARAṆASAPTAMĪVRATAKATHĀ.

Pages, 6. Lines, 24 on a page.

Begins on fol. 23*b* of the MS. described under No. 15739.
Complete.
Same work as that described under No. 8201 ante.

No. 15748. आमुक्ताभरणसप्तमीव्रतोद्यापनविधिः.
ĀMUKTĀBHARAṆASAPTAMĪVRATŌDYĀPANAVIDHIḤ.

Pages, 3. Lines, 24 on a page.

Begins on fol. 26*a* of the MS. described under No. 15739.
Complete.
Similar to the work described under No. 8205 ante.

Beginning:

उद्यापनविधिं भूयः श्रोतुमिच्छामि सुव्रत ।
तत्सर्वं वद मे ब्रह्मंस्त्रिकालज्ञ महामते ॥

ईश्वरः—

आदौ मध्ये तथा चान्ते यथाशक्त्यनुसारतः ।
वत्सरेष्वप्यनुध्यानपूजादानादि कारयेत् ॥
प्रतिमां कारयेत् स्वर्णं रौप्यं वा कर्षमात्रतः ।
तथाप्यर्धेन वा कुर्यात् वित्तशाठ्यं न कारयेत् ॥
पूर्वोक्तदेवमालिख्य वस्त्रयुग्मेन वेष्टयेत् ।
ताम्राष्टपात्रान् स्थाप्यैतत्तण्डुलोपरि वेदिकाम् ॥

End:

ब्राह्मणेभ्योऽन्नदानं च दापयेच्छतमर्धकम् ।
अशक्तः पञ्चविंशद्वा पश्चात्पारणमाचरेत् ॥
दक्षिणां च ततो दद्याद् ब्राह्मणेभ्यः स्वशक्तितः ।
चिन्तयेत् तद्दिने देवमित्युद्यापनमाचरेत् ॥

Colophon:

इति आमुक्ताभरणसप्तमीव्रतोद्यापनं समाप्तम् ॥

No. **15749.** आर्द्राष्टमीव्रतकल्पः.
ĀRDRĀṢṬAMĪVRATAKALPAḤ.

Pages, 4. Lines, 24 on a page.

Begins on fol. 28*a* of the MS. described under No. 15739.
Complete.
Same work as that described under No. 8217 ante.

No. **15750.** अष्टमीचतुर्दशीव्रतकल्पः.
AṢṬAMĪCATURDAŚĪVRATAKALPAḤ.

Pages, 3 Lines, 24 on a page.

Begins on fol. 29*b* of the MS. described under No. 15739.
Complete.
Same work as that described under No. 8215 ante.

No. 15751. शिवकृष्णाष्टमीव्रतकल्पः.
ŚIVAKṚṢṆĀṢṬAMĪVRATAKALPAḤ.

Pages, 3. Lines, 24 on a page.

Begins on fol. 31*a* of the MS. described under No. 15739.

Complete.

Same work as that described under No. 8534 ante.

No. 15752. उमामहेश्वरव्रतकल्पः.
UMĀMAHĒŚVARAVRATAKALPAḤ.

Pages, 5. Lines, 24 on a page.

Begins on fol. 32*a* of the MS. described under No. 15739.

Complete.

Same work as that described under No. 8224 ante.

No. 15753. विष्णुशिवप्रतिष्ठाकल्पः.
VIṢṆUŚIVAPRATIṢṬHĀKALPAḤ.

Pages, 5. Lines, 24 on a page.

Begins on fol. 34*a* of the MS. described under No. 15739.

Deals with the procedure for the installation of the image of God Viṣṇu and Śiva.

Complete.

Beginning:

विष्णुप्रतिष्ठां वक्ष्यामो यथास्माभिः स पद्यते ।
पूर्वेद्युरह्नि पुण्याहं वाचयित्वा ततो निशि ॥
सुवर्णालङ्कृतं विष्णुमभिषिच्य तु मार्जनैः ।
व्याहृतीभिश्चैव मिश्रेण यवदूर्वाङ्कुशैस्तथा ॥
पालाशाश्वत्थपर्णाभ्यां हिरण्येन च भाजनैः ।
कपिलापञ्चगव्येन ततश्चरणयोर्हरेः ॥

End:

विश्वभुक् सर्वभूतात्मा प्रणवादिनमोऽन्तकान् ।
जपित्वाथ दरिद्रांश्च भोजयेद् ब्राह्मणान् दश ॥

रुद्रप्रतिष्ठामप्येवं रौद्रैर्मन्त्रैश्च कुर्वते ।
शिवलिङ्गं च सूर्यं च न गृहे स्थापयेत् बुधः ॥

Colophon:

इवि भविष्योत्तरपुराणे शिवलिङ्गविष्णुप्रतिष्ठाकल्पः संपूर्णम् (:) ॥

No. **15754.** महावर्तिव्रतकल्पः.
MAHĀVARTIVRATAKALPAḤ.

Pages, 4. Lines, 24 on a page.

Begins on fol. 36*a* of the MS. described under No. 15739.

Complete.

Same work as that described under No. 8411 ante.

No. **15755.** महादीपव्रतकल्पः.
MAHĀDĪPAVRATAKALPAḤ.

Pages, 4. Lines, 24 on a page.

Begins on fol. 37*b* of the MS. described under No. 15739.

Complete.

Same work as that described under No. 8408 ante.

No. **15756.** महातिलदीपव्रतकल्पः.
MAHĀTILADĪPAVRATAKALPAḤ.

Pages, 5. Lines, 24 on a page.

Begins on fol. 39*b* of the MS. described under No. 15739.

Complete.

Same work as that described under No. 8406 ante with slightly different beginning.

Beginning:

पार्वती—

सर्वेषां सुकृतानां च महत्फलमवाप्यते ।
तीर्थदानैर्जपैर्होमैर्व्रतैरन्यैश्च पूजयेत् ॥
यत्फलं लभते मर्त्य एकेनैव तु यत्फलम् ।
एतत्समस्तं मे ब्रूहि जगतां रक्षकारक ॥
शृणु देवि प्रवक्ष्यामि व्रतानामुत्तमं व्रतम् ।
महादीपव्रतं पुण्यं सर्वपापप्रणाशनम् ॥

सर्वव्रतानां परमं रहस्यं मुक्तिदायकम् ।
येन वै कथ्यमानेन अधर्मो विलयं व्रजेत् ॥
तदहं कीर्तयिष्यामि शृणु चैकाग्रमानसः ।
सङ्क्रान्तौ मकरे पुण्ये कालमर्धोदयेऽपि वा ॥
स्नात्वा नद्यां शुचिर्भूत्वा स्वस्तिवाचनपूर्वकम् ।
नवाढकाख्यं गव्याज्यं देवदेवस्य सन्निधौ ॥
स्नाप्य पञ्चामृतैर्देवं षोडशैरुपचारकैः ।

No. 15757. महादीपव्रतकल्पः.
MAHĀDĪPAVRATAKALPAḤ.

Pages, 3. Lines, 24 on a page.

Begins on fol. 43b of the MS. described under No. 15739.

Same work as that described under No. 8407 ante.

Complete.

No. 15758. अर्धोदयकल्पः.
ARDHŌDAYAKALPAḤ.

Pages. 6. Lines, 24 on a page.

Begins on fol. 44b of the MS. described under No. 15739.

Complete.

Same work as that described under No. 8207 ante.

No. 15759. सोमवारव्रतकल्पः.
SŌMAVĀRAVRATAKALPAḤ.

Pages, 6. Lines, 24 on a page.

Begins on fol. 47a of the MS. described under No. 15739

Complete.

Same work as that described under No. 8584 ante.

No. 15760. सोमवारव्रतोद्यापनकल्पः.
SŌMAVĀRAVRATŌDYĀPANAKALPAḤ.

Pages, 3. Lines, 24 on a page.

Begins on fol. 49b of the MS. described under No. 15739

Complete.

Same work as that described under No. 8586 ante.

No. 15761. वैतरणीगोदानविधिः.
VAITARAṆĪGŌDĀNAVIDHIḤ.

Pages, 2. Lines, 24 on a page.

Begins on fol. 50*b* of the MS. described under No. 15739.

Incomplete.

It is stated in some Purāṇas that after death, every soul on its way to the abode of Yama, has to cross the river Vaitaraṇī, which is full of deadly creatures. The work under notice deals with the gift of a cow by a dying man to a worthy Brahmin, the gift being supposed to help the soul in crossing the Vaitaraṇī.

Beginning:

अथ वैतरणिदानम्—

आसन्नमृत्युना देया गौः सवत्सा च पूर्ववत् ।
तदभावे तु गौरेव नरकोत्तारणाय वै ॥
पूर्ववत् स्वर्णशृङ्गी वा विधिना रौप्यजां तथा ।
तथा यदि न शक्नोति दातुं वैतरणीं तु गाम् ॥

End:

तासां प्रमाणं रूपं च शृणु सत्यं भयापहम् ।
शतयोजनविस्तीर्णं बृह्रा . . . . . . ॥

No. 15762. उमामहेश्वरव्रतकल्पः.
UMĀMAHĒŚVARAVRATAKALPAḤ.

Pages, 14. Lines, 24 on a page.

Begins on fol. 52*a* of the MS. described under No. 15739.

Incomplete.

Same work as that described under No. 8220 ante.

No. 15763. नष्टदोरप्रायश्चित्तम्.
NAṢṬADŌRAPRĀYAŚCITTAM.

Pages, 2. Lines, 24 on a page.

Begins on fol. 59*a* of the MS. described under No. 15739.

Same work as that described under No. 8361 ante.

Complete.

No. 15764. अनन्तव्रतोद्यापनकल्पः.
ANANTAVRATŌDYĀPANAKALPAḤ.

Pages, 36. Lines, 24 on a page.

Begins on fol. 59*b* of the MS. described under No. 15739.

Complete.

Same work as that described under No. 8184 ante.

No. 15765. वरलक्ष्मीव्रतकल्पः.
VARALAKṢMĪVRATAKALPAḤ.

Pages, 3. Lines, 24 on a page.

Begins on fol. 77*a* of the MS. described under No. 18739.

Complete.

Same work as that described under No. 8487 ante.

No. 15766. यमुनापूजा.
YAMUNĀPŪJĀ.

Pages, 6. Lines, 24 on a page.

Begins on fol. 78*a* of the MS. described under No. 15739.

Complete.

Same work as that described under No. 8426 ante.

No. 15767. अनन्तव्रतकल्पः.
ANANTAVRATAKALPAḤ.

Pages, 8. Lines, 24 on a page.

Begins on fol. 80*b* of the MS. described under No. 15739.

Complete.

Same work as that described under No. 8174 ante.

No. 15768. अनन्तव्रतोद्यापनकल्पः.
ANANTAVRATŌDYĀPANAKALPAḤ.

Pages, 10. Lines, 24 on a page.

Begins on fol. 84*a* of the MS. described under No. 15739.

Complete.

Slightly different from the work described under No. 8189 ante.

No. 15769. उमामहेश्वरव्रतकल्पः.
UMĀMAHĒŚVARAVRATAKALPAḤ

Pages, 6. Lines, 24 on a page.

Begins on fol. 89*a* of the MS. described under No. 15739.
Complete, wants beginning.
Same work as that described under No. 8222 ante.

No. 15770 उमामहेश्वरव्रतकल्पः.
UMĀMAHĒŚVARAVRATAKALPAḤ.

Pages, 2. Lines, 24 on a page.

Begins on fol. 92*a* of the MS. described under No. 15739.
Incomplete.
Same work as that described under No. 8221 ante.

No. 15771 लक्ष्मीनारायणव्रतकल्पः.
LAKṢMĪNĀRĀYAṆAVRATAKALPAḤ.

Pages, 22. Lines, 24 on a page.

Begins on fol. 93*a* of the MS. described under No. 15739.
Complete.
Same work as that described under No. 8468 ante.

No. 15772. लक्ष्मीनारायणव्रतकल्पः.
LAKṢMĪNĀRĀYAṆAVRATAKALPAḤ

Pages, 19. Lines, 24 on a page.

Begins on fol. 103*b* of the MS. described under No. 15739.
Complete.
Same work as that described under No. 8467 ante.

No 15773. बृहत्युमाव्रतकल्पः.
BṚHATYUMĀVRATAKALPAḤ.

Page, 1. Lines, 24 on a page.

Begins on fol. 113*a* of the MS. described under No. 15739.
Wants beginning.
Same work as that described under No. 8397 ante.

No. **15774.** तुलसीव्रतकल्पः.
TULASĪVRATAKALPAḤ.

Pages, 4. Lines, 24 on a page.

Begins on fol. 113*a* of the MS. described under No. 15739.
Complete.
Same work as that described under No. 8312 ante.

No. **15775.** मथनद्वादशीव्रतम्.
MATHANADVĀDAŚĪVRATAM.

Pages, 2. Lines, 24 on a page.

Begins on fol. 115*a* of the MS. described under No. 15739.
Complete.
Same work as that described under No. 8401 ante.

No. **15776.** धात्रीकल्पः.
DHĀTRĪKALPAḤ.

Pages, 2. Lines, 24 on a page.

Begins on fol 115*b* of the MS. described under No. 15739.
Complete.
Same work as that described under No. 8349 ante.

No. **15777.** रथसप्तमीव्रतम्.
RATHASAPTAMĪVRATAM.

Pages, 4. Lines, 24 on a page

Begins on fol. 116*b* of the MS. described under No. 15739.
Complete.
Same work as that described under No. 8433 ante.

No. **15778.** हरितालिकाव्रतकल्पः.
HARITĀLIKĀVRATAKALPAḤ.

Pages, 12. Lines, 24 on a page.

Begins on fol. 118*b* of the MS. described under No. 15739.
Complete.
Same work as that described under Nos. 8606 and 8607 ante.

No. **15779.** सन्तानगोपालव्रतम्.
SANTĀNAGŌPĀLAVRATAM.

Pages, 6. Lines, 24 on a page.

Begins on fol. 124*a* of the MS. described under No. 15739.
Incomplete.
Same work as that described under No. 8561 ante.
Fol. 125 gives the contents of this work.

No. **15780.** योगजतन्त्रम्.
YŌGAJATANTRAM.

Pages, 139. Lines, 24 on a page.

Begins on fol. 128*a* of the MS. described under No. 15739.
Breaks off in the Liṅgalakṣaṇavidhiḥ.
Same work as that described under R. No. 5289 of the Triennial Catalogue of Sanskrit MSS., Vol. VI.

No. **15781.** गोत्रप्रवरमञ्जरी.
GŌTRAPRAVARAMAÑJARĪ.

Substance, paper. Size, $9\frac{3}{4} \times 7\frac{1}{2}$ inches. Pages, 22. Lines, 21 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Complete.
Similar to the work described under No. 2933 ante.
By Puruṣōttama.

Beginning :

यज्ज्ञं यत्स्थं यदीयं जगदिदमखिलं यल्लयं यत्प्रधानं
यत्प्रेष्यं यन्निवासस्थिर . चहृदयं यत्पुरा संप्रभूतम् ।
यत्क्रीडं वस्तुभूतं यदनुभवसुखं यत्स्वरूपानभिज्ञं
यत्स्वापं यत्प्रबोधं यदतिहिततमं ब्रह्म तस्मै नमोऽस्तु ॥
आचार्यान् वेदकल्पान् परहितनिरतान् कल्पसूत्रप्रणेतॄन्
सर्वान् बोधायनादीन् प्रणिपतितजनत्राणशीलान् प्रणम्य ।
तत्सूत्रोपात्तगोत्रप्रवरसुमनसां मञ्जरीं तां करिष्ये
यद्ध्यानात् कर्मकाण्डं फलति निजफलं ज्ञानकाण्डं च सर्वम् ॥
मत्स्यं कूर्मवराहखञ्जनृहरीन् रामांश्च रामानुजान्
नत्वा द्वादशकल्किविष्णुसहितान् ब्रह्मावतारानिमान् ।

तत्तत्प्रोक्तपुराणभारतगताः स्मृत्यन्तरोक्ताश्च ये
तैर्गोत्रप्रवरैश्च पूर्वगदितां बध्नाम्यहं मञ्जरीम् ॥
कन्यामूढ्वा स्वगोत्रप्रवरपुरुषजां मातृवद्दोषदण्ड-
प्रायश्चित्तादिभाग्यज्जनयति च सुतं जातिचण्डालमस्याम् ।
अज्ञात्वोढ्वोपगम्य प्रतिगमनमर्हत्यैन्दवं सा च जाया
गर्भश्चेत्स्याददुष्टः स मुनिभिरुदितः काश्यपो गोत्रविद्भिः ॥

* * * *

अत्र बोधायनापस्तम्बसत्याषाढकुण्डिनभरद्वाजलौगाक्षिकात्यायनाश्वलायनादिभिः कल्पसूत्रकारैः मत्स्यादिभिः पुराणकारैः भारतादीतिहासकारैर्मन्वादिभिः स्मृतिकारैश्चोपदिष्टान् प्रवराध्यायानुपलभ्योदाहृत्य तत्तद्भाष्यकारमतानुसारेणैव गोत्रस्वरूपं गोत्रसङ्ख्यासमानगोत्रत्वं तत्कृतं चाविवाहं प्रवरस्वरूपं प्रवरसङ्ख्याप्रवरविकल्पसमानप्रवरतां तत्कृतं चाविवाहं यथोपदेशं यथाप्रज्ञं च बहुश्रुतानां मन्दधियामुपकारार्थमीश्वरप्रसादादाचार्यप्रसादाच्च वर्णत्रयाणां प्रवरान् व्याख्यास्यामः । तत्र कल्पसूत्रप्रमाणस्मृतिकारैरेकेनैव क्रमेण गोत्रप्रवरकाण्डान्युपदिष्टानि ।

End:

अत्र च वचनात् ब्रह्मणोऽपि राज्यं ब्राह्मणपुरोहितप्रवरेणैव प्रवृणीत इतीदमपि सूत्रं शाखान्तरीयश्रुतिवाक्यमेवेति मन्तव्यम् । विज्ञायत इत्युक्त्वेति ।

Colophon:

इति श्रीपुरुषोत्तमपण्डितविरचितायां गोत्रप्रवरमञ्जर्यामापस्तम्बसत्याषाढादिसूत्रोक्तगोत्रप्रवरकाण्डानामाद्यं परिभाषासूत्रकाण्डं व्याख्यातम् ॥

No. 15782. अष्टादशरहस्यार्थविवरणम्.

AṢṬĀDAŚARAHASYĀRTHAVIVARAṆAM.

Substance, paper. Size, 12 × $5\frac{1}{2}$ inches. Pages, 26. Lines, 11 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Complete

Same work as that described under No. 5199 ante.

By Rāmānuja.

No 15783. वृत्तिसिद्धरूपसंग्रहः.
VṚTTISIDDHARŪPASAṄGRAHAḤ.

Substance, paper. Size, 7½ × 4, 1/16 inches. Pages, 14 Lines, 10 on a page. Character, Telugu. Condition, good. Appearance, old.

Incomplete.

Same work as that described under No. 1558 ante.

No. 15784. रुद्रजाप्यम्.
RUDRAJĀPYAM.

Substance, paper. Size, 11½ × 5 inches. Pages, 39. Lines, 8 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Complete.

A prayer addressed to God Rudra (Śiva), as found in Vājasanēya-saṁhitā.

Beginning:

गणानां त्वा गणपतिं हवामहे प्रियाणान्त्वा प्रियपतिं हवामहे निधीनां त्वा निधिपतिं हवामहे व्वसो मम । आहमजानिगर्ब्भधमात्व मजासिगर्ब्भधम् । गायत्री त्रिष्टुप् । गायत्री त्रिष्टुप् जगत्यनुष्टुप्युङ्क्त्या सह । बृहत्पुङ्क्तिमहा ककुप्सूचीभि शम्यन्तु त्वा ।

End:

पश्येम शरदः शतम् जीवेम शरदः शतं शृणवाम शरदः शतम्प्रब्रवाम शरदः शतमजीताः स्याम शरदः शतं भूयश्च शरदः शतात् ।

Colophon:

इति वाजसनेयसंहितायां दीर्घपाठे रुद्रजाप्ये अष्टमोऽध्यायः ॥ समाप्तम् ॥

संवत् १९२९ वैशाखशुक्ल ७ शनौ ॥

No. 15785. चमत्कारचिन्तामणिः, सव्याख्यः.
CAMATKĀRACINTĀMAṆIḤ WITH COMMENTARY.

Substance, paper. Size, 11 × 4½ inches. Pages, 42. Lines, 10 on a page. Character, Dēvanāgarī. Condition, slightly injured. Appearance, old.

A work on astrology by Nārāyaṇabhaṭṭa. It is followed by a commentary called Anvayārthadīpikā; by Dharmēśvara.

Complete.

Beginning :

(मू)—

तनुस्थो रविस्तुङ्गयष्टिं विधत्ते मन सन्तपेत् दारदायादवर्गात् ।
वपुः पीड्यते वातपित्तेन नित्यं स वै पर्यटन् ह्रासवृद्धिं प्रयाति ॥

धने यस्य भानुः स भूम्याधिकस्स्यात्
चतुष्पात्सुखं सद्व्यये स्वंच याति ।
कुटुम्बे कलि जायया जायतेऽपि
क्रिया निष्फला याति लाभस्य हेतोः ॥

(व्या) —

गणेशं शिवं भास्करं रामचन्द्रं भवानीं प्रणम्याथ टीकां सुरम्याम् ।
चमत्कारचिन्तामणे दैववेदिप्रबोधाय धर्मश्वरः संब्रवीति ॥

अथ लग्नकुण्डलिकायां जातकोक्तभावफलाफलज्ञानाय चमत्कारचिन्तामणिं विवक्षुर्नारायणाचार्यः प्रारिप्सितनिर्विघ्नपरिसमाप्त्यर्थं श्रीकृष्णप्रणाम रूपं मङ्गलमाचरन् शिष्यशिक्षायै निबध्नातीत्यर्थ ।

लसत्पीतपट्टाम्बरं कृष्णचन्द्रं मुदा राधयालिङ्गितं विद्युनेव ।
घनं संप्रणम्यात्र नारायणाख्य श्चमत्कारचिन्तामणिं संप्रवक्ष्ये ॥

अत्रास्मिन् ग्रन्थप्रारम्भसमये नारायणनामाचार्योऽहं लसच्छोभत् पीतवर्णपट्टाम्बरं यस्य तं विद्युताद् घनं मेघमिव राधयालिङ्गितं कृष्णचन्द्रमिवाह्लादकं श्रीकृष्णं प्रणम्य कायवाङ्मनोभिर्नत्वा चमत्कारचिन्तामणिनामानं ग्रन्थं संप्रवक्ष्ये सम्यक् प्रकारेण रचयामीत्यर्थः ।

* * * *

तत्रादौ रवेः तन्वादिभावफलानि कथयति । यस्य तनुस्थो लग्नस्थो रविस्तस्य तुङ्गयष्टिमुष्टिमुच्चस्वरूपं विधत्ते । दारदायादवर्गात् स्त्रीपुत्रादिसमूहात् मनः सन्तपेत् सन्तापं प्राप्नुयात् । वातपित्तेन वायुयुतपित्तेन वपुः शरीर पीड्यते । तथा स पुरुषः पर्यटन् देशान्तरं गच्छन् नित्यं निश्चितं ह्रासवृद्धिं धनन्यूनाधिकत्वे प्रयाति प्राप्नोति ।

End :

चमत्कारचिन्तामणेश्चारुटीकाचकारन्दयार्थप्रबोधप्रदीपाम् । ?
सुदैवज्ञधर्मेश्वरो मालवीयः प्रमोदाय भूदेवविद्वज्जनानाम् ॥

Colophon:

इति नारायणभट्टकृतचमत्कारचिन्तामणिग्रन्थः समाप्तिमगात् ।

(टी)—अथ ग्रन्थस्तुतिपूर्विकां स्वप्रौढिमाह । चमत्कारचिन्तामणौ ग्रन्थे भट्टनारायणेन जन्मकुण्डलिकायां जातकोक्तभावजं यत्फलं कीर्तितं कथितम् यो द्विजः पठेद्राज्ञां सभायां तस्य समक्षं तन्निकटं प्रवक्तु अन्ये नैव समर्था भवन्तीति शेषः ।

Colophon:

इति चमत्कारचिन्तामणेरन्वयार्थदीपिकायां भावफलाध्यायः समाप्तः ॥

The scribe adds—

शुभम् ! सं. १९४० भाद्र शु ७ रा ॥

No. **15786.** सेतुबन्धव्याख्या.

SĒTUBANDHAVYĀKHYĀ.

Substance, paper. Size, 12 × 4¾ inches. Pages, 298. Lines, 10 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Breaks off in the 9th Āsvāsa.

Similar to the work described under R. No. 5134 ante.

By Rāmadāsa son of Udayarāja, whose genealogy is given in the introductory stanzas. According to this commentary, Kālidāsa wrote the Sētubandha under the orders of king Vikramāditya.

Beginning:

असितमहसि सेतौ पट्टिकायामुदश्च-
त्तटयुगघनमुक्तावर्णपङ्क्तिद्वयेन ।
अलिखदिव कठिन्या यत्प्रशस्तिं समुद्रः
स जयति रघुवंशग्रामणी रामचन्द्रः ॥
गङ्गाम्बुस्तिमिताङ्घ्रिमौलि दिनकृत्कन्याम्बुकम्बुप्रभं
तत्त्वां पातु समुद्रजागिरिजयोरानन्दबीजं महः ।
नाभीपङ्कजनाभि(ल)मूलमिलनात् सव्यांसकूलस्थितो
यत्र स्थूलमृणालवल्लितुलनामालम्बते भोगिराट् ॥
अद्वैतदन्तकल्पितकरेणुमयवामभागमिभवदनम् ।
पितुरर्धनागरीकं वपुरनुकुर्वन्तमिव कलये ॥
आ मेरोरा समुद्रादवति वसुमतीं यः प्रतापेन ताव
द्दूरे गाः पाति मृत्योरपि करममुचत्तीर्थवाणिज्यवृत्त्योः ।

अप्यश्रौषीत्पुराणं जयति च दिनकृन्नामयोगं विधत्ते
गङ्गाम्भोभिन्नमम्भो न च पिबति जयत्येष जङ्घालदीन्द्रः ॥

अङ्गं वङ्गं कलिङ्गं सिविहठतिपुराकामताकामरूपा-
नान्ध्रं कर्णाटलाटद्रविडमरहठद्वारकाचोलपाण्ड्यान् ।
भोटान्तं मारुवारोत्कलमलयखुरामानखन्धारजम्बू
काशीकाश्मीरटङ्कावलकवदकखाकाविलान्यः प्रशास्ति ॥

कलियुगमहिमापचीयमानश्रुतिसुरभिद्विजधर्मरक्षणाय ।
श्रितसगु तनुं तमप्रमेयं पुरुषमकव्वरसाहमाननोऽस्मि ॥

अंशे रघोरुष्णकरस्य वंशे बभूव राजा कुलदेवशातः ।
श्रीमानसिंहप्रमुखा जयन्ति यदन्वये संप्रति कच्छवाहः ॥

सूनुस्तस्य विरोधिवारणमदाकूपारकालानलो
जङ्घालो रणरङ्गभूमिषुबली यः क्षेमराजोऽभवत् ।
वीरो दीप्तयशःकदम्बतुलितक्षीरोदनीरोदर
तस्याजायत पञ्चसायकरुचिर्माणिक्यरायः सुतः ॥

एतस्यापि मुकुन्दवन्दनवलत्पुण्यो वदान्यो जग-
न्मान्यो मोकलरायभूपतिरभूत्सङ्क्रान्तभूपान्तरः ।

तस्मादप्यजनिष्ट बाहुजकुलक्षीराब्धिहीरायितः
धीरारायमहीमहेन्द्रतिलको वीरावलीभिस्स्तुतः ॥

नापारायनृपः कृपानिधिरभूदस्यापि सूनुर्महा-
नुद्दामप्रतिपक्षकुञ्जरघटासङ्घट्टकण्ठीरवः ।
एष प्रेङ्खदशेषशत्रुविजयव्यापारपारङ्गमं
पुत्रं पातलरायमायतभुजादण्डोद्धुरं लब्धवान् ॥

खानारायस्ततोभूदरिदहनघनः प्रौढनाराचधारा-
धारासाराभिवर्षी समरभुवि लसत्कार्मुको गाढगर्जः ।
सूनुस्तेनारिसेनाम्बुधिकलशभवोऽलम्भि कन्दर्पकाय-
श्चन्दारायस्त्रिलोकीतलविशदयशोवीचिनीचीकृतेन्दुः ॥

अभवदुदयराजः प्रौढभूभृत्समाज-
प्रथितगुणगरिष्ठस्तत्सुतो धर्मनिष्ठः ।

समरभुवि न के वा निर्जिता येन देवा-
धिपतिपुरपुरन्ध्रीगीतदोर्विक्रमेण ॥

दिनेशभक्त्या जगति प्रकाशस्ततस्सुतोऽजायत रामदासः ।
आसेवते जिष्णुमिव क्षितीन्द्रं यस्सर्वभावेन जलालदीन्द्रम् ॥

धीराणां काव्यचर्चाचतुरिमविधये विक्रमादित्यवाचा
यं चक्रे कालिदासः कविमुकुटविधुः सेतुनामप्रबन्धम् ।
तद्व्याख्यां सौष्ठवार्थं परिषदि कुरुते रामदासः स एव
ग्रन्थं जल्लालदीन्द्रक्षितिपतिवचसा रामसेतुप्रदीपम् ॥

इह सविधे साधूनां भविता न कदापि दुर्जनप्रसरः ।
गरुडोद्गारसमीपे न भवति गरलोद्गमः क्वापि ॥

* * * *

राजाहमाधुधविलासवशीकृतोऽह-
मित्यत्र मा कृतधियः कुरुतावहेलाम् ।
मद्रोत्र एव जगतीपतिरस्त्रशिक्षा-
दक्षो मनीषिमुकुटं मनुराविरासीत् ॥

इह तावन्महाराजप्रवरसेननिमित्तं महाराजाधिराजविक्रमादित्येनाज्ञप्तो निखिलकविचक्रचूडामणिः कालिदासमहाशयः सेतुबन्धप्रबन्धं चिकीर्षुर्निर्विघ्नपरिसमाप्त्यर्थं रामचन्द्रात्मकमधुमथनरूपाभीष्टदेवतानमस्कारोपदेशमुखेन मङ्गलमाचरन्नाह —णमहेति । हे जना मधुमथनं विष्णुं नमत नमस्कुरुत । तथा चाहमपि तंप्रत्यस्मि प्रणत इत्याक्षेपलभ्यम् । मधुं मथ्नातीति मधुमथनस्तमिति कर्तरि ल्युट् ।

* * * *

Colophon:

रामप्रस्थानदशया रामदासप्रकाशिता ।
रामसेतुप्रदीपस्य पूर्णाभूत्प्रथमा शिखा ॥

End:

Colophon:

सेतुनिष्पत्तिदशया रामदासप्रकाशिता ।
रामसेतुप्रदीपस्य पूर्णाभूदष्टमी शिखा ॥

अथाश्वासकेनैव सुवेलं वर्णयति—अथेति । अथ सुवेलस्य प्राप्त्यनन्तरं प्लवङ्गाः सुवेले प्रेक्षन्ते कोटिकोटिशः पर्वत उत्पाटिता ईदृशः कोऽपि न दृष्ट इति विस्मयादिति भावः ।

* * * *

यद्वा ताराङ्गदं, तकारस्तरणिः प्रोक्तइति कोशस्तस्य सूर्यस्य अरङ्गदं तादृशशिखरैर्वर्त्मावरोधकत्वादरङ्गप्रदमित्यर्थः । रङ्गउल्लासः । यद्वा ताराङ्गतम्, तादृशशिखरोर्द्धमैस्ताराणामङ्गता गुणीभावो यस्मात्तम् । रजतशिखरकान्तिभिस्ताराणां तिरोहितत्वादित्यर्थः । अथवा तुङ्गे उच्चप्रदेशे रजतं रूप्यं शिखरं ।

No. 15787. विश्वप्रकाशः.
VIŚVAPRAKĀŚAḤ.

Substance, paper. Size, 11 × 4½ inches. Pages, 309. Lines, 8 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Complete.

Same work as that described under No. 1745 ante. For remarks and extracts see pages 44 and 192 of the Report on search for Sanskrit and Tamil MSS. By M. Seshagiri Sastri No. 2.

By Mahēśvara.

No. 15788. अभिधानचिन्तामणिः.
ABHIDHĀNACINTĀMAṆIḤ.

Substance, paper. Size, 10⅝ × 4¼ inches. Pages, 41. Lines, 15 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Complete.

Same work as that described under R. No. 2086(*a*) of the Triennial Catalogue of Sanskrit MSS., Vol. III, Part I—A.

By Hēmacandra.

No. 15789. गौतमधर्मसूत्रम्.
GAUTAMADHARMASŪTRAM.

Substance, paper. Size, 10½ × 8 1/16 inches. Pages, 37 Lines, 16 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Complete.

Same work as that described under No. 1200 ante.

No. 15790. दायूदोगीतानि.
DĀYŪDŌGITĀNI.

Substance, paper. Size, 12½ × 8 inches. Pages, 199. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, old.

A Sanskrit rendering of the English hymns sung by David.
Complete.
Similar to the work described under No. 14934 ante.

Beginning:

अथ दायूद्राजेन कृतानि गीतानि—इङ्ग्लण्डीयवङ्गदेशीयपण्डितैः ईब्रूयभाषातो व्याकृतानि संस्कृतश्लोकैः प्रकाश्यन्ते ।

कलिकातानगरे ग्रन्थोऽयं मुद्राङ्कितोऽभूत् ।

शकाब्दे १७६९, सन् १८३९ ।

१. प्रथमं गीतम्—

पुण्यवतां सुखं पापकृतां दुःखम्—

यो जनः पापिलोकानां मन्त्रणानुगतो न हि ।
अपराधी मनुष्याणां पथि नैव च तिष्ठति ॥
एकासनेन चासीनो निन्दकैश्च जनैस्सह ।
परन्तु परमेशस्य शास्त्रे तुष्टो हि नान्यतः ॥
एवं दिवा च रात्रौ च शास्त्रस्य परमेशितुः ।

End:

एवं वदत तं धन्यं सुश्राव्यकरतालकैः ।
तं धन्यं ब्रूत चैवोच्चध्वनिभिः करतालकैः ॥
ब्रुवन्तु धन्यं सर्वेऽपि प्राणिनः परमेश्वरम् ।
धन्यवादं परेशस्य कुरुध्वं सर्वमानवाः ॥

No. 15791. महापुराणम्.
MAHĀPURĀṆAM.

Substance, paper. Size, 13 × 8⅛ inches. Pages, 1132. Lines, 30 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete in 76 Parvans.

Same work as that described under No. 14832 ante and R. No. 137(*b*) of the Triennial Catalogue, Vol. I, Part I-A.

By Jinasēna and Guṇabhadra.

No. **15792.** शतदूषणीव्याख्यानम्—चण्डमारुतः.

ŚATADŪṢAṆĪVYĀKHYĀNAM: CAṆḌAMĀRUTAḤ.

Substance, paper. Size, 13¼ × 8¼ inches. Pages, 512. Lines, 30 on a page. Character, Grantha. Condition, good. Appearance, old.

Contains the Skandhas 1 to 32 complete.

Same work as that described under No. 5041 ante.

By Mahācārya.

No. **15793.** आपस्तम्बश्रौतप्रयोगः.

ĀPASTAMBAŚRAUTAPRAYŌGAḤ.

Substance, paper. Size, 12 × 9½ inches. Pages, 178. Lines, 24 on a page. Character, Grantha. Condition, good. Appearance, old.

Deals with some of the sacrifice rites according to the Āpastamba school of Yajur Vēda.

Contains the following Prayōgas :—

१. अग्निहोत्रप्रयोगः wants beginning.
२. पिण्डपितृयज्ञविधिः.
३. सौमिकयाजमानम्.
४. सर्वप्रायश्चित्तम्.
५. कूश्माण्डहोमविधिः.
६. पशुबन्धः.
७. दर्शपूर्णमासप्रयोगः.

Beginning:

समुद्रं मनसा ध्यायति अथ जपति, अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यतां पशून् व्रतपते व्रतं . . . ध्यताम् । आदित्यव्रतपते . . . राध्यताम् । व्रतानां व्रतपते . . . राध्यताम् । अथादित्यमुपतिष्ठते । संम्राडसि व्रतपांसि व्रतपतिरसि तत्ते प्रबव्रीमि तच्छकेयं तेन शकेयं तेन राध्यासं । त्रिवृत्पलाशे दर्भ इया प्रादेशसंमितं यज्ञे पवित्रं पोत्रतमं पयो हव्यं करोतु मे ।

End:

अग्नेनयेत्यादि सर्वान् पथो अनृणा आक्षीयेम
नमस्ते गार्हपत्याय नमस्ते दक्षिणाग्नये . ।
नमस्ते आहवनीयाय महावेद्यै नमो नमः
काण्ड . . . . यज्ञेशाय नमो नमः ॥

The scribe adds—

दर्शपूर्णमासप्रयोगपुस्तकं वैद्यनाथदीक्षितेन पूर्णीकृतम् ॥

No. 15794. गद्यत्रयम्.
GADYATRAYAM.

Pages, 22. Lines, 15 on a page.

Begins on fol. 1*a*, of the MS. described under No. 2232.

Same work as that described under No. 9937 ante.

Complete.

By Rāmānuja.

No. 15795. कपर्दिकारिका.
KAPARDIKĀRIKĀ.

Pages, 89. Lines, 9 on a page.

Begins on fol. 22*a* of the MS. described under No. 1074.

Complete.

Same work as that described under No. 15629 ante for the beginning.

By Kapardin.

End:

तद्दक्षिणा पैतृकभुक्तदेशो होमस्तु पश्चात्तत एव देशः ।
उपास्य सन्ध्यामथ पूर्वरात्रौ जपासनं होष्य नियम्य कायम् ॥
आधारयेदिध्मबर्हिर्द्विजानामामन्त्रणं मैथुनदर्शनं च ।
कृत्वाऽपरेद्युः पचनं प्रभाते पित्रर्थमन्नस्य पृथक् च भूते ॥

Colophon:

इति दशमः पटलः ।
कपर्दिऋषिणा उक्ताः कारिकास्समाप्ताः ॥

No. 15796. तत्त्वचिन्तामणिव्याख्या—फक्किका.
TATTVACINTĀMAṆIVYĀKHYĀ : PHAKKIKĀ.

Substance, palm-leaf. Size, 16 × 11½ inches. Pages, 128. Lines, 9 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Caturdaśalakṣaṇī incomplete (wanting the beginning and end).

Same work as that described under No. 4019 ante.

By Mathurānātha.

No. 15797. कुवलयानन्दः.
KUVALAYĀNANDAḤ.

Substance, palm-leaf. Size, 14½ × 1½ inches. Pages, 40. Lines, 8 on a page. Character, Nandināgari. Condition, good. Appearance old.

Wants the beginning and end.

Same work as that described under No. 12846 ante.

By Appayadīkṣita

No. 15798. वैजयन्ती.
VAIJAYANTĪ.

Substance, palm-leaf. Size, 13 × 1 inches. Pages, 84. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

Same work as that described under No. 1753 ante.

By Yādavaprakāśa.

Contains the द्व्यक्षरकाण्ड complete and the त्र्यक्षरकाण्ड incomplete.

No. 15799. वेदान्तविजयव्याख्या—मङ्गलदीपिका.
VĒDĀNTAVIJAYAVYĀKHYĀ: MAṄGALADĪPIKĀ.

Substance, palm-leaf. Size, 15½ × 1½ inches. Pages, 242. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Siddhāntalēśasaṅgraha 122*a*.

Incomplete.

Same work as that described under No. 5021 ante.

By Sudarśanaguru.

No. 15800. सिद्धान्तलेशसङ्ग्रहः.
SIDDHĀNTALĒŚASAṄGRAHAḤ.

Pages, 64. Lines, 9 on a page.

Begins on fol. 122*a* of the MS. described under last No.

First Paricchēda incomplete.

Same work as that described under No. 4764 ante.

By Appayadīkṣita.

No. 15801. वैजयन्ती.

VAIJAYANTĪ.

Substance, palm-leaf. Size, 15 × 1¼ inches. Pages, 110. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

Same work as that described under No. 1753 ante

By Yādavaprakāśa.

Contains the नानार्थकाण्ड and शेषकाण्ड complete.

No 15802. श्रीनिवासचम्पूः.

ŚRĪNIVĀSACAMPŪḤ.

Substance, palm leaf. Size, 17 × 1½ inches. Pages, 42. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

A work in prose and poetry on the greatness of the deity enshrined on the Tirupati hills.

By Kuppaya.

Complete in 6 Gucchas.

Beginning:

श्रीमद्वेङ्कटशैलाय तस्मिन्नित्यनिवासिने ।
नतोऽहं कलये तस्मै श्रीनिवासाय चान्वहम् ॥
सृक्कद्वन्द्वविनिर्गलद्धरसुतास्तन्यं गजास्यं शिशुं
विघ्न . . . . विश्वातिशायिप्रदम् ।
अज्ञानार्णवमग्नभक्तजनतासत्कर्णधारं मुदा
ध्याये मामकमानसेऽहमनिशं प्रारिप्सितार्थाप्तये ॥
अम्भोजासनलालिताखिलजनज्ञानप्रदानक्षमा
फुल्लच्छारदिकारविन्दविलसत्कर्णान्तनेत्रानना ।
. . . . . निर्जितेश्वरशिरश्चन्द्रातपा मङ्गलं
वासं चापि ददातु मामकमुखे वाणी भृशं सर्वदा ॥
अनन्तकल्याणगुणाश्रयो यः सोऽनन्तकल्याणमशेषकाम्यम् ।
विधाय चादावघशाधनं मे ददातु वः श्रीनिलयश्च देवः ॥
श्रीमद्वेङ्कटशैलवर्यवसतिं तं श्रीनिवासाभिधं
नत्वा देवमभीष्टदं . . . . चक्रायुधम् ।
चक्रेऽहं सनरामराखिलजगत्पूज्यस्य तस्य प्रभोः
माहात्म्यस्य कथां पुराणविनुतां चम्पूप्रबन्धाभिधाम् ॥

* *

चतुर्मुखात्रिमार्कण्डेयभृग्वादिभिः परीतमिन्द्रादिलोकपालैरप्सरोगणैश्चाह-र्निशमुपसेवितं वराहवदनं देवमाराद्देव प्रणम्य तदूरीकृतान्तिकागमनश्चोप-निषद्वाक्यैरभिष्टूय नारदोऽत्यन्तहृष्टमानसस्तत्सन्निधौ . . तस्थौ । तदानी-मेव दिव्यदुन्दुभिध्वनिः प्रादुरासीत् ।

* * * *

शृणु देवि सुमेरुहिमवद्विन्ध्यमन्दरगन्धमादनचित्रकूटमाल्यवत्पारियात्र-मलयमहेन्द्रसह्यार्तिहैरवतकाञ्चनारुणहस्तिगृध्रघटिकाचलास्त्वाधाराः शैलवराः । तेष्वन्तिमाश्चत्वारो धराः क्षीरनदीसमीपगाः । तेषु हस्तिशैलादुत्तरतः पञ्च-योजनपरिमितप्रदेशे सुवर्णमुखरी नाम नदीनां प्रवरा काचिन्नदी वर्वर्ति । तदुत्तरतः (कमल) सरोवरतीरे भगवान् श्रीकृष्णरूपेण बलरामसंयुतः शुक-मुनिवरदो भक्तार्तिभञ्जनो वैखानसैर्नित्यमाराधितो निवसति । तत्कमलसरो-वरादुत्तरतः क्रोशद्वयमात्रे हरिचन्दनाशोक . . . . वेङ्कटाचलो नाम शैलेन्द्रो महान् सप्तयोजनविस्तीर्णो योजनोच्छ्रायो दशयोजनायतः स्वर्णमयो वासुदेवालयो वरिवर्ति ।

End:

सूत . . . . . . मुनिभ्यो माहात्म्यं श्रीनिवासदेवस्य ।
अवदत् पुलकितः . . . . भविष्यंचैव शौनकादिभ्यः ॥
शृणुयाद्वेङ्कटपतेर्माहात्म्यं श्रीनिवासदेवस्य ।
स तु भुक्त्वाखिलभोगानन्ते विष्णोः पदं च तद्गच्छेत् ॥
शेषाद्रीशस्यायं त्रिभुवनविततस्य कीर्तिपुञ्जस्य ।
चम्पूप्रबन्धकेऽस्मिन् षष्ठो गुच्छोऽगमत्पदालीनाम् ॥

Colophon:

इति श्रीनिवासचम्पूप्रबन्धे षष्ठो गुच्छस्समाप्तिमगमत् ।

श्रीमच्छङ्करपादपङ्कजरसभ्रान्तिभ्रमत्खञ्जरी-
भूतस्वान्तरहर्निशं समतनोच्चम्पुप्रबन्धं सुधीः ।
श्रीशेषाद्रिनिवासिनो भगवतः श्रीश्रीनिवासप्रभो-
र्माहात्म्यस्य . . पुराणविनुतं श्रीकुप्पयाख्यः कविः ॥
वोगोपिवंशवाराशिशशिना सुधियादरात् ।
कुप्पयाख्येन कथितं भूयात् कृष्णार्पणं सदा ॥

No. 15803. दयाशतकम्, सव्याख्यानम्.

DAYĀŚATAKAM WITH COMMENTARY.

Substance, palm-leaf. Size, 17½ × 1½ inches. Pages, 94. Lines, 5 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Nyāsaviṁśati with commentary 48*a*. Nyāsatilaka with commentary 60*a*.

Complete.

Same work as that described under No. 10007 ante. By Vēdāntadēśika and Vēṅkaṭādrinivāsa of Ātrēyagōtra.

The scribe adds—

पार्थिवसंवत्सरं माघमासे शुक्लद्वितीयायां वेदान्ताचार्यसूक्तिरूपा दयाशतकव्याख्या लेखनेन परिसमाप्ता ॥

No. 15804. न्यासविंशतिः, सव्याख्या.

NYĀSAVIMŚATHI WITH COMMENTARY.

Pages, 23. Lines, 6 on a page.

Begins on fol. 48*a* of the MS. described under the last No.

Complete.

Same work as that described under No. 10141 ante.

By Vēdāntadēśika and Śrībhāṣya Śrīnivāsācārya of Kauśikagōtra.

No. 15805. न्यासतिलकम्, सव्याख्यानम्

NYĀSATILAKAM WITH COMMENTARY.

Pages, 22. Lines, 6 on a page.

Begins on fol. 60*a* of the MS. described under No. 15803.

Complete, but wants the beginning.

Same work as that described under No. 10109 ante.

By Vēdāntadēśika and Varadācārya alias Naināràcārya.

No. 15806. ब्रह्मसूत्रम्.

BRAHMASŪTRAM.

Substance, palm-leaf. Size, 6½ × 1½ inches. Pages, 42. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete.

Same work as that described under No. 4649 ante.

No. 15807. कृष्णयजुस्संहितापदपाठः.
KṚṢṆAYAJUSSAṂHITĀPADAPĀṬHAḤ.

Substance, palm-leaf. Size, 15 × 1¼ inches. Pages, 146. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Same work as that described under No. 90 ante.
Wants the beginning and end

No. 15808. क्रियादीपः.
KRIYĀDĪPAḤ.

Substance, palm-leaf. Size, 8⅝ × 1 inches. Pages, 18. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

On the daily duties to be performed by a Śrīvaiṣṇava Brahmin.

By Parāśarabhaṭṭa.

Complete.

Beginning :

श्रीपराशरभट्टार्यः . . . . . भूयसे ॥
पुंसे परस्मै लक्ष्म्यै च नमस्स्तबकिताः स्तुतीः ।
कुर्महेऽहंक्रियारब्धसंसाराब्धितितीर्षया ॥
पूर्वाचार्यान्नमस्तांस्तैरर्चये भक्तिभावितैः ।
यत्पादभक्तिर्वैकुण्ठपदप्राप्त्यधिरोहणी ॥
विष्णोर्नित्यार्चनविधिं भुक्तिमुक्तिप्रदायकम् ।
सारतः संप्रवक्ष्यामि सर्वेषां सुग्रहाय च ॥
काल्ये समुत्थाय हरेश्चिन्तयेत् प्रणमेद्वदेत् ।
रूपं पदाब्जे नामानि मनसा शिरसा गिरा ॥

End :

निवेद्यात्मानमात्मीयं प्रणम्यार्चां समापयेत् ।
चण्डादिद्वारपालांश्च कुमुदादींस्तथैव च ॥
अर्घ्यादिभिरथाभ्यर्च्य हविश्शेषैर्बलिं क्षिपेत् ।
विष्णोर्निवेदितं सर्वं गुरुभ्यश्च निवेदयेत् ॥

विष्णोर्निवेदितं सर्वं पश्चाद्भुञ्जीत च स्वयम् ।
कृतं भट्टारकार्येण क्रियादीपं समुज्ज्वलम् ॥
प्रेक्षध्वं पुण्डरीकाक्षपरिचर्यापरायणाः ।

Colophon:

इति क्रियादीपः संपूर्णः ॥

No. **15809**. कृष्णकर्णामृतम्.
KṚṢṆAKARṆĀMṚTAM.

Substance, palm-leaf. Size, 15 × 1½ inches. Pages, 66. Lines, 4 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete.

Same work as that described under No. 9885 ante.

By Kṛṣṇalīlāśuka.

No. **15810**. शिवसहस्रनामावलिः.
ŚIVASAHASRANĀMĀVALIḤ.

Substance, palm-leaf. Size, 14½ × 1¼ inches. Pages, 32. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Śivakarṇāmṛta 17*a*.

Complete.

Same work as that described under No. 9282 ante.

No. **15811**. शिवकर्णामृतम्.
ŚIVAKARṆĀMṚTAM.

Pages, 50. Lines, 6 on a page.

Begins on fol. 17*a* of the MS. described under the last No.

Complete.

Same work as that described under No. 11189 ante.

By Bharadvāja.

No. **15812**. सोमोत्पत्तिः.
SŌMŌTPATTIḤ.

Substance, palm-leaf. Size, 15½ × 1¼ inches. Pages, 6. Lines, 4 on a page. Character, Nandināgarī. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Bhāgavatavyākhyā 4*a*. Yamunāpūjā 12*a*.

Incomplete.

Same work as that described under No. 2592 ante.

No. 15813. भागवतव्याख्या.
BHĀGAVATAVYĀKHYĀ.

Pages, 16. Lines, 4 on a page.

Begins on fol. 4*a* of the MS. described under the last No.

Incomplete.

Same work as that described under No. 2233 ante.

By Vijayadhvaja.

Beginning:

षष्ठस्कन्धीयव्याख्या विजयध्वजीयानुमानफक्किकार्थो विचार्यते—अयमीश्वरः स्वस्वेतरवृत्तित्वानाक्रान्तपरिच्छिन्ननिष्ठात्यन्तपरिच्छिन्ननिष्ठाधिकरणं मेयत्वात् घटवदित्यनुमानम् । अयमीश्वर इति पक्षनिर्देशः । स्वस्वेतरवृत्तित्वानधिकरणमिति साध्यनिर्देशः । मेयत्वादिति हेतुः । घटवदिति दृष्टान्तः । यत्र मेयत्वं तत्र स्वस्वेतरवृत्तित्वानाक्रान्तपरिच्छिन्ननिष्ठाधिकरणत्वम् ।

End:

नन्वेतानि दूषणानि मूलाभिप्रेतानीति चेद्विजयध्वजाचार्यैरनुमानमात्रमेवाभिधीयते । दूषणानि कुतो नोक्तानीति चेत्, मैवम् । अगणितत्वादिमूलमाकलय्य शिष्यैरेव स्वयमूहितव्यानीति अनुमानमात्रमेवाभिहितं टीकाचार्यचरणैरित्यलं पल्लवितेन ।

No. 15814. यमुनापूजा.
YAMUNĀPŪJĀ.

Pages, 9. Lines, 6 on a page.

Begins on fol. 12*a* of thb MS. described under No. 15812.

Complete.

Same work as that described under No. 8419 ante.

No. 15815. स्तोत्ररत्नभाष्यम्.
STŌTRARATNABHĀṢYAM.

Substance, palm-leaf. Size, $12\frac{1}{2} \times 1\frac{1}{2}$ inches. Pages, 218. Lines, 9 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Incomplete.

Same work as that described under R. No. 317 of the Triennial Catalogue of Sanskrit MSS.

By Vēdāntadēśika.

No. 15816. आपस्तम्बपूर्वप्रयोगः.
ĀPASTAMBAPŪRVAPRAYŌGAḤ.

Substance, palm-leaf. Size, 12 × 1 inches Pages, 76 Lines, 7 on a page Character, Grantha. Condition, good Appearance, old.

Incomplete.

Similar to the work described under No. 65(*b*) of the Triennial Catalogue.

Beginning:

